BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

No. 108.

बोधसारः ।

श्रीविद्वद्वर्यनरहरिविरचितः ।

तच्छिष्यश्रीदिवाकरकृतयाऽर्थदीप्त्या सहितः ।

श्रीमदुदासीनवर्यस्वामिगोविन्दानन्दशिष्येण

दयानन्दस्वामिना परिशोधितः ।

BODHASÂR,

A TREATISE ON VEDÂNTA,

BY

ŚRÎ NARAHARI,

With a commentary by the author's pupil

PANDIT DIVÂKAR.

EDITED BY

SWÂMÎ DAYÂNAND.

Fasciculus VII.

BENARES:

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press,

BENARES.

1905.

सूचीपत्रम् ।

गणपाठः	०	४	
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
ज्योतिषतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला ~))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	१	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	१	०	०
[illegible]	०	१	०
क्षेत्रकौमुदी	०	६	०
क्षेत्रसंहिता	२	०	०

स्वानुभवानामिति । स्वानुभवानां स्वः स्वीय आत्मविषयकोऽनुभवोऽनुभूतिः, यद्वा तस्याप्यात्मनः पृथगसत्त्वात्स्वात्मभूतोनुभवो येषामस्ति ते तथोक्तास्तेषां जीवन्मुक्तानां व्यवहारकाले बाधिताहङ्कारे बाधितोऽसत्त्वेन निश्चितो योऽहङ्कारोऽहङ्कृतिस्तस्मिन्सत्यपि विद्यमानेपि समाधिभङ्गः समाधेः स्वात्माकारवृत्तिलक्षणस्य परपुरुषासक्तस्त्रीपरपुरुषसङ्गसुखाकारवृत्तेरिव स्नेहातिशयाद्भङ्गो नाशो नास्ति न भवतीत्येवमर्थोऽस्य प्रकरणस्य ज्ञेयः ॥ ६ ॥

इति श्रीनरह० दि० बोधसारार्थदीप्तौ स्वेच्छाचारार्थप्रकाशः सप्तविंशः ॥ २७ ॥

अथाहङ्कारस्याबाधकत्वप्रदर्शनत्रयी ।

एवं स्वेच्छाचारपञ्चकं निरूप्येदानीं ज्ञानिषु व्यवहारकालेऽहङ्कारसत्त्वेपि तस्य बाधितत्वेनाबाधकत्वं दर्शितमेव द्रढयितुं सदृष्टान्तमहङ्कारस्याबाधकत्वप्रदर्शनत्रय्याख्यं त्रिश्लोकं प्रकरणमभिदधान आह ।

अथाहंकारस्याबाधकत्वप्रदर्शनत्रयी ।

अथेति । अथ स्वेच्छाचारपञ्चकनिरूपणानन्तरमहङ्काराबाधकत्वप्रदर्शनत्रय्यहङ्कारस्याहंकृतेर्यदबाधकत्वमुक्तं तदेव प्रदर्श्यतेऽनया सा तादृशी त्रयी त्रयाणां श्लोकानां समाहारस्त्रयी–एतन्नामकं प्रकरणमित्यर्थः, निरूप्यत इति शेषः; तत्र तावदादौ दृष्टान्तमाह सार्धेन ।

भित्तिचित्रकृतं सर्पं दृष्ट्वा बालः पलायते ।
केन चिद्बालकेनोक्तं चित्रसर्पोयमित्युत ॥ १ ॥

भित्तीति । बालोऽव्युत्पन्नो डिम्भो भित्तिचित्रकृतं भित्तौ

कुड्ये यस्मिन चित्राणि तेषु कृतं लिखितं सर्पं भुजङ्गं दृष्ट्वाऽव-
लोक्य पलायते ततः स्थानात्त्वरयाऽपसर्पति यदा तदा केन-
चिदन्येन बालकेन किंचिद्व्युत्पन्नेन पोतेनायं भवद्दृष्टश्चित्रसर्पश्च-
त्रस्थः सर्पो भुजङ्गोऽस्तीत्युक्तेवं प्रकारेणोक्तं कथितम् ॥ १ ॥

ततः प्रभृत्यसौ विद्वांस्तेनैव सह खेलति ।
तथात्मस्थमहंकारं श्रुत्वा मूढः पलायते ॥ २ ॥

तत इति । असौ बालस्ततः प्रभृति तं कालमारभ्य वि-
द्वान्सर्पमिथ्यात्वज्ञानवान्ततोऽन्यत्र सत्यसर्पे सर्पसत्त्वज्ञानवान्
तेनैव मिथ्यात्वेन ज्ञातेन चित्रसर्पेण सहैव साकमेव खेलति क्री-
डति यथा । दार्ष्टान्तिकमाह तथेति, तद्वत्तथा मूढोऽज्ञानी-
आत्मस्थमात्मनि प्रत्यगात्मनि स्थमधिष्ठितमहङ्कारमहंकृतिं
श्रुत्वा शास्त्रोक्तं श्रवणेन निश्चित्य पलायते तद्भयेन समाधौ
लीनो भवति ॥ २ ॥

तत्र सद्गुरुणा प्रोक्तं चिदेवास्तीह नेतरत् ।
ततः प्रभृत्यसौ विद्वांस्तेनैव सह खेलति ॥ ३ ॥

इति श्रीनरहरिकृतौ बोधसारेहङ्काराबाधकत्वप्रदर्शनत्रयी ॥ २८ ॥

तत्रेति । तत्राहङ्कारभाने तद्भये च सद्गुरुणा सत्त्वहङ्कारादि-
जगन्मिथ्यात्वज्ञानपूर्वमात्ममाथार्थ्यज्ञानवान्यो गुरुर्महावाक्यद्वा-
राऽऽत्मयाथार्थ्यस्वरूपबोधकस्तेनेहाहङ्कारादिजगद्भाने चिदेव
चेतनमेव प्रत्यगात्मचैतन्यमेव केवलमस्ति विद्यते नेतर-
त्तदन्यत्किमपि अहङ्कारादिकं नास्तीत्येवं प्रोक्तं कथितं
यदा तदा ततः प्रभृति तत्कालमारभ्यासावुक्तलक्षणो मूढः
पूर्वं स एव विद्वानहङ्कारादिमिथ्याज्ञानपूर्वमात्मयाथार्थ्यवेत्ता
सन्परवस्थया तेनैवाहङ्कारादिजगतापि सह साकं बाधित-

स्वाभिशाङ्कं खेलति क्रीडति बाधिताहङ्कारस्य मुनौ बाध-
कत्वं नास्तीति भावः ॥ ३ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपि-
काहङ्काराबाधकत्वप्रदर्शनत्रय्यर्थप्रकाशोऽष्टाविंशः ॥ २८ ॥

अथ प्रश्नोत्तरमुक्ताफलद्वयम् ।

एवमहङ्काराबाधकत्वप्रदर्शनत्रयीं निरूप्येदानीमात्मचि-
न्तने स्वनाशभावनया तत्रानादरं जिज्ञासोरालक्ष्य तदभावं
दर्शयितुं जीवविषयवासनासम्वादप्रतिपादकं प्रश्नोत्तरमुक्ताफ-
लद्वयाख्यं प्रकरणं द्विश्लोकं निरूपयिष्यन्नाह ।

अथ प्रश्नोत्तरमुक्ताफलद्वयम् ।

अथेति । अथाहङ्काराबाधकत्वप्रदर्शनत्रयीनिरूपणानन्तरं प्र-
श्नोत्तरमुक्ताफलद्वयं प्रश्नोनुयोग उत्तरं प्रतिवचनं ते एवमुक्ताफले
मौक्तिके तयोर्द्वयं युग्मेमतन्नामकं प्रकरणमित्यर्थः, निरूप्यत
इति शेषः, तत्रादौ जीवं प्रति विषयवासनाप्रश्नं निरूपयितुमाह ।

तत्र विषयवासनोवाच ।

तत्रेति । तत्रात्मनाशसम्भावनायां विषयवासना विषयाः श
ब्दस्पर्शादयस्तेषां वासनेच्छोवाच जीवं प्रतीति शेषः, कथया-
मास । किमुवाच तदाह ।

अहिक्रीडा न कर्त्तव्या कर्त्तव्यं नात्मचिन्तनम् ।
अहो जीव महामूढ मरणं ते भविष्यति ॥ १ ॥

अहिक्रीडेति । हे महामूढ हे महामूर्ख इति स्वेष्टनाशप्रतीत्या
ऽऽक्रन्दपूर्वकं संबोधनम्, अहो जीव अनेन संबोधनेन स्वजीवनहे-
तुत्वाज्जीवहितवक्तव्यता स्वस्य सूचिता, त्वयाऽहिक्रीडाऽहि-
ना सर्पेण स्वनाशकारणत्वात्सर्पसदृशेनात्मना सह क्रीडा रति-

जीवनेच्छावता पुरुषेण सर्पेण साकं रतिरिव न कर्तव्या न कार्या तदेव स्पष्टमाहाऽऽत्मचिन्तनमिति, आत्मनः प्रत्यगभिन्नब्रह्मणश्चिन्तनं स्मरणं न कर्तव्यं न कार्यं कुत इत्यत आह मरणमिति, ते तवोभयकरणेन मरणं मृत्युर्भविष्यति भवेदत उभयमपि समानमतो न कार्यमित्याशयः ॥ १ ॥

एवं प्रश्नमभिधायेदानीमुत्तरं वदन्नाह ।

स जीव उवाच ।

स इति । स उक्तरीत्या विषयवासनया पृष्टो जीवः उवाच साधिष्ठानबुद्धिस्थश्चिदाभासः कथितवान्, किमुवाचेत्यत आह।

अहिनानेन ये दष्टा अमरत्वं गता हि ते ।
अस्यामृतमयी दंष्ट्रा तत्क्रीडाम्यमुनाहिना ॥ २ ॥

इति श्रीनरहरि० बो० प्रश्नोत्तरमुक्ताफलद्वयमेकोनत्रिंशः ॥ २९ ॥

अहिनेति । अनेनात्मस्वरूपेणाहिना न हीयते नश्यतीत्यहिरविनाशिस्वरूपो जीवत्वनाशकत्वादहिरिव तेन ये विरला दष्टा भुक्तास्ते पुरुषाः शुकादयोऽमरत्वं न विद्यते मरो मरणं यत्र तदमरं ब्रह्म तस्य भावस्तत्त्वं ब्रह्मत्वं गताः प्राप्ता ब्रह्माभिन्ना जाता इत्यर्थः, हि प्रसिद्धमेतच्छ्रुतिषु विद्वत्सु च । अथवा न हिनस्ति नाशयतीत्यहिर्जीवस्य जीवनहेतुत्वात् 'को ह्येवान्यात्कः प्राण्यायदेष आकाश आनन्दो न स्यादि'ति श्रुतेः, अन्यत्समानं तत्तस्मात्कारणादमुना प्रत्यक्षेणाऽहिनाऽविनाशिस्वरूपेण मज्जीवनभूतेन चात्मना सह क्रीडामि रमे, ननु सर्पदंशे मृत्युरेव भवतीति प्रसिद्धिस्तत्कथमेतदहिदंशेऽमरत्वप्राप्तिः सम्भाव्येत्याशङ्क्याहाऽस्येति, अस्यात्मसर्पस्य दंष्ट्रा दंशक्रियाकरणरूपा वृत्तिर्विवेकाख्याऽमृतमयी—अमृतं मरणरहितं ब्रह्मात्मत्वमेव प्रधानं यस्यां सा तथोक्ताऽस्ति अत ए-

तदंशेऽमरत्वप्राप्तिर्निश्चेतव्येति भावः ॥ २ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ प्रश्नोत्तरमुक्ताफलद्वयार्थप्रकाश एकोनत्रिंशः ॥ २९ ॥

अथ प्रश्नोत्तरचमत्कारत्रयी ।

एवं प्रश्नोत्तरमुक्ताफलद्वयं निरूप्येदानीं पूर्वं ज्ञानिष्वहङ्कारस्याबाधकत्वमुक्तं तत्र ज्ञानिष्वहङ्कारस्य विद्यमानत्वे व्यवहारोऽपि स्यात्तस्मिंश्च सति पूर्ववत्कामादीनां बलं स्यादित्याशङ्क्य तां निराकर्तुं प्रश्नोत्तरचमत्कारत्रय्याख्यं त्रिश्लोकं प्रकरणमभिदधान आह ।

अथ प्रश्नोत्तरचमत्कारत्रयी ।

अथेति । अथ प्रश्नोत्तरमुक्ताफलद्वयानन्तरं प्रश्नोत्तरचमत्कारत्रयी प्रश्नश्चानुयोग उत्तरं च प्रतिवाक्यं तयोश्चमत्कारः कौतुकं विलास इत्यर्थः, तस्य प्रतिपादिका त्रयी श्लोकत्रयरूपा प्रक्रियैतन्नामकं प्रकरणमित्यर्थः, निरूप्यत इति शेषः । तत्रादौ मोहादीनां कामादीन्प्रति प्रश्नवचनमुदाहरति ।

यथापूर्वं न खेलन्ति यथापूर्वं हसन्ति न ।
केश्चित्कामादयः पृष्टाः भवन्तः किं हतप्रभाः ॥ १ ॥

यथापूर्वमिति । भो कामादयो भवन्तो यथापूर्वं पूर्वकाले यथा यद्वत्खेलन्तः स्थितास्तथेदानीं न खेलन्ति न क्रीडन्ति, किञ्च भवन्त इदानीं हतप्रभा हता नष्टा प्रभा येषां ते तथोक्ताः किं कुतः कारणादित्येवं कैश्चिन्मोहादिविकारैः कामादयः कामोऽभिलाष आदिर्मुख्यो येषां ते पृष्टा अनुयुक्ताः ॥ १ ॥

कामादीनामिदानीं मोहादीन्प्रत्युत्तरं वदन्नाह ।

कामादय ऊचुः।

कामादय इति। कामादयः कामोभिलाष आदिर्येषां क्रोधादीनां ते तथोक्तास्त ऊचुः कथयामासुः, किमित्यत आह।

अस्मान्पुष्णाति या नित्यं साऽस्माकं जननी मृता।
सुखलुब्धेन पित्रा नः का चिदन्या कृता वधूः ॥ २॥

अस्मानिति। हे मोहादयो याऽविद्या नित्यं सर्वदाऽस्मान्कामादिविकारान्पुष्णाति पालयति साऽस्माकं कामादीनां जननी माता मृता नष्टा, ननु भवतां मातरि नष्टायामपि पितृतः पालनं भवतु तत्राहुः सुखलुब्धेनेति, नोऽस्माकं सुखलुब्धेन सुखं स्त्रीभोगजन्यं लोके। परमार्थतस्तु विद्यासुखं तस्मिल्लुब्ध आसक्तस्तेन पित्राऽस्मत्पालनमनादृत्य पाति अस्मानिति पिता जनकोहङ्कारस्तेन काचिदपूर्वाऽनिर्वचनीयेति यावदन्या द्वितीया विद्याख्या वधूः स्त्री 'वधूर्जाया स्नुषा स्त्री च' इत्यनेकार्थः, वधयति नाशयति सर्वमविद्याकृतं संसारमिति वधूर्विद्या कृता परिणीता संपादितेत्यर्थः ॥ २ ॥

ननु सा भवतां पालनं कुर्यात्तत्राह।

अस्मान्द्विष्यति सा नित्यं न पुष्णाति कदाचन।
दिनैः कतिपयैरेव गृहत्यागो भविष्यति ॥ ३ ॥

इति श्रीनरहरिकृतौ बोधसारे प्रश्नोत्तरचमत्कारत्रयी त्रिंशा ॥ ३० ॥

अस्मानिति। सा सपत्नी माताऽस्मान्कामक्रोधादिविकारान्नो नित्यं सर्वदैव द्विष्यति द्वेष्टि दोषदृष्ट्याऽवलोकयतीत्यर्थः, किञ्च साविद्याऽस्मान्कामादीनविद्यापुत्रांश्च कदाचन कस्मिन्नपि समये न पुष्णाति नैव पालयति, किञ्चाऽतः कतिपयैः

कतिचित्संख्यैर्दिनैर्दिवसैरस्माकं कामादीनां गृहत्याग एव गृहं मन्दिरं शरीरं च तस्य त्यागो विसर्जनमपि भविष्यति भवेद्विद्यायाऽविद्यानाशे कृतेप्यहङ्कारसत्त्वं कामादिपोषकं न भवति प्रत्युत विद्यासुखलोभेन तद्द्वेष एवातः क्रमेण कामादिविकारलय एव सम्भाव्य इति भावः ॥ ३ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ प्रश्नोत्तरचमत्कारत्रय्यर्थप्रकाशस्त्रिंशः ॥ ३० ॥

अथ स्तनपानलीलाष्टकम् ।

एवं प्रश्नोत्तरचमत्कारत्रय्याहङ्कारसत्त्वेपि विद्वत्सु क्रमेण दृश्यमानकामादिनाशं सम्भावयित्वेदानीमहङ्कारसत्त्वेप्यहमावच्छिन्नस्य विद्याभासस्यापि विद्यायामेव रुचिमुत्पादयितुं स्तनपानलीलाष्टकाख्यमष्टश्लोकं प्रकरणमभिदधान आह ।

अथ स्तनपानलीलाष्टकम् ।

अथेति । अथ प्रश्नोत्तरचमत्कारत्रयी निरूपणानन्तरं स्तनपानलीलाष्टकं स्तनयोः पानं स्तनपानं दुग्धपानमित्यर्थः, तद्रूपा लीला क्रीडा तस्याः प्रतिपादकमष्टकमष्टश्लोकसमूहरूपं प्रकरणं निरूप्यत इत्यर्थः ।

श्रीगुरुरुवाच ।

तत्रादौ श्रीगुरुः वैराग्यादिस्वरूपसंपत्तिमान् हितोपदेष्टोवाच कथयामास, किं कथयामास तदाह ।

उपमाता च माता च बाल मातृद्वयं हि ते ।
उपमातुः स्तनरसः कट्वम्लमधुतिक्तकः ॥ १ ॥

उपमातेति । हे बाल हे पुत्र ते तव हि प्रसिद्धं मातृद्वयं मात्रोर्ज-

न्योर्द्वयं युग्ममस्ति, ननु मातृत्वे समाने तयोर्भेदः किं निबन्धनस्त-त्राहोपमातेति, उपमाता च धात्री—एका, माता च जननी च द्वितीया, पालकत्वेन मातृत्वे समानेपि पोषकत्वजनकत्वरूपवैलक्षण्येन भेदो ज्ञेय इति भावः । प्रकृतार्थेतु हे बाल हे मूढ अनेन संबोधनेनो-पमातृतुल्याविद्यास्तनरसतुल्यविषयरसासक्त्या मूढत्वं त्वयि वि-शिष्टमिति द्योतितं, हि प्रसिद्धं ते तव साधिष्ठानबुद्धिस्थचिदा-भासस्येत्यर्थः, मातृद्वयं मात्रोः परिच्छेदकारणरूपोपाध्योर्द्वयं द्विक-मस्तीति ज्ञेयं, ननु परिच्छेदहेतुत्वं समानं भेदहेतोर्वैलक्षण्याभा-वात्तदभावे च कथं तयोर्द्वित्वं सम्भाव्यं तत्राहोपमाता चेति, उपमाता चोपमीयते परिच्छिद्यते, यद्वोपमीयत उपमाविषयी-क्रियत आत्माऽनयेति उपमाताऽविद्या माता च मीयते सा-क्षात्क्रियते जीवब्रह्मैक्यमनया सा माता विद्या च चकाराभ्या-मत्यन्तं वैलक्षण्यं सूचितम्, एवं मातृभेदं प्रदर्श्येदानीं बालत्वादे-वोपमातरि विशेषप्रीतिमालक्ष्य तत्राप्रीतिं मातरि च प्रीतिं ज-नयितुमुपमातुस्तनरसस्वादं दर्शयति उपमातुरिति, हे बाल त-वोपमातुर्धात्र्याः स्तनरसः स्तनयोः कुचयो रसो रस्यत आ-स्वाद्यत इति रसः पयः कट्वम्लमधुतिक्तकः कट्वम्लमधुतीक्ष्ण-भक्षणात्कटुरम्लो मधुस्तिक्तश्चानेकरसोऽत एव चित्रद्वैत-रसात्मकश्चित्रोऽनेकरसो द्वैतरसो भिन्नास्वादरूपोऽस्ति ॥ १ ॥

स्वरूपं प्रदर्श्य फलमपि दर्शयति ।

जरामरणसंसर्गी चित्रद्वैतरसात्मकः ।
निजमाता तव तु या तन्माहात्म्यं वदाम्यहम् ॥२॥

जरेति । जरामरणसंसर्गी जरा वार्धक्यं तत्सदृशं नै-र्बल्यं वा मरणमपि अकालमरणं तत्सदृशं वा धर्मार्थका-ममोक्षानुपयोगिमूढजीवनं वा ते संसृज्येते प्राप्येते अ-

नेनेति स तथोक्तोऽस्मिन्नस्ति स तादृशो ज्ञेयः । प्रकृतार्थे तु हे बाल हे मूढ त उपमातुरविद्यायाः स्तनरसः स्तन्यन्ते ध्वन्यन्ते नामभिः प्रतिपाद्यन्त इति स्तना इह लोकपरलोकभवा विषयास्तत्प्रापकसाधनप्रतिपादकानि शास्त्राणि च तेषां रसः सुखं तत्प्रतिपाद्यं च सुखं कट्वम्लमधुतिक्तक एवं कटुरम्लो मधुर्मधुरस्तिक्तकस्तीक्ष्ण एवं चित्रद्वैतरसात्मकश्चित्रमाश्चर्यरूपं यद्द्वैतं भेदस्तद्विशिष्टो यो रसः सुखमात्मा स्वरूपं यस्य स तथोक्तोऽस्ति, फलतोपि दोषं दर्शयति जरेति, जरा वार्धक्यं मरणं मृत्युस्ते संसृज्येते प्राप्येते अनेनेति स तथोक्तः सोऽस्मिन्नस्तीति स तथोक्तोऽस्ति अतस्तदादरो नैव कार्य इति भावः, ननु मम मातुस्तर्हि किंस्वरूपं तदुद्देसाशङ्क्याह निजेति । तव ते तुशब्दोऽत्रोक्तोपमातृतोऽस्या वैलक्षण्यद्योतनार्थः, या त्वज्जातौ प्रसिद्धा निजमाता निजा स्वीया माता जनन्यस्ति तन्माहात्म्यं तस्यास्त्वदीयमातुर्माहात्म्यं महत्त्वं वदामि कथयामि अहं त्वदुपदेष्टा ॥ २ ॥

तत्प्रतिज्ञातमेवाह ।

सैव माता पिता सैव जगतामीश्वरी च सा ।

सा गतिः सा परं तत्त्वं तत्परं नास्ति किञ्चन ॥३॥

सैवेति । सैव तव माता जननीयं धात्री न जननीत्यर्थः, तथा तव सैव जनन्येव पिता पालको जनक इत्यर्थः, जगतां सर्वेषामपि लोकानामीश्वरी धर्मशास्त्रे पूज्यत्वेन प्रतिपादिता सा माता बालानां गतिः शरणमस्ति तथा सा माता परं तत्त्वं बालानामुपास्या परब्रह्मरूपाऽतो बालानां तत्परं ततो मातृतः परमन्यत्सेव्यं श्रेष्ठं नास्ति न विद्यते किञ्चन किमपि । प्रकृतार्थे तु सैव विद्यैव माता मीयते साक्षादनुभूयते

ब्रह्मानया सा माता विद्यैव माता नान्येत्यर्थः, तथा सैव वि-द्यैव पिता पालको मृत्युमुखरूपसंसाराद्रक्षकत्वादित्यर्थः, च पुनर्जगतां समस्तलोकानामीश्वरीश्वरोपाधित्वादीश्वररूपेण पूज्या सा विद्यास्ति सा विद्या गतिर्मुमुक्षूणां शरणमस्ति किं च सा विद्या परं कार्यकारणातीतं तत्त्वमनारोपितं वस्तु अस्ति ब्रह्मेत्यर्थः, तत्परं ततो विद्यायाः परमन्यच्छ्रेष्ठं किञ्च न किमपि नास्ति न विद्यतेऽतोऽविद्यां परित्यज्य त्वया विद्यैवाश्रयणीयेति भावः ॥ ३ ॥

भिन्नजातित्वादपि धात्री त्याग उचित इति दर्शयन्धा-त्रीमात्रोर्जातिभेदमाह ।

उपमाता कुजातिस्ते माता तव सुजातिका ।
तां कुजातिं परित्यज्य सुजातिं मातरं श्रय ॥ ४ ॥

उपमातेति । ते तवोपमाता धात्री कुजातिः कुत्सिता नीचा जातिर्यस्याः सा कुजातिरस्ति तव ते माता जननी सुजातिका सु शोभना जातिर्यस्या सा तथोक्ता श्रेष्ठजात्युत्पन्ने-त्यर्थः, अतस्त्वं तामुक्तलक्षणां कुजातिं कुत्सितजातिं धात्रीं प-रित्यज्य विहाय सुजातिमुत्तमजातिं मातरं जननीं श्रया-श्रितो भव, अन्यथा कुजातिसम्पर्के बुद्धिमालिन्येनाधर्माच-रणान्नरकपातः स्यादिति भावः । प्रकृतार्थे तु हे मूढ ते तवोप-मातोपमीयते परिच्छिद्यतेऽनया सोपमाताऽविद्या कुजातिः कुत्सितो जन्ममरणसुखदुःखादिमाञ्जायत उत्पद्यते यया सा कुजातिर्ज्ञेया, तव ते माता मीयते साक्षादनुभूयते तत्त्वं यया सा तथोक्ताऽहंब्रह्मेत्याकारा प्रमा रूपा वृत्तिरित्यर्थः, सु-जातिका सुष्ठु शोभनो जायते भूयते यया सा तथोक्ता ब्रह्म-

स्वरूपो जायते ययेति भावः, ज्ञेया ऽतस्त्वं मुमुक्षुः कुजातिं सुखदुःखजन्ममरणादियुक्तत्वोत्पादनकर्त्रीं तामविद्यां परित्यज्य विहाय सुजातिं स्वस्य ब्रह्मभावोत्पादनकर्त्रीं मातरं मीयते साक्षात्क्रियत आत्मतत्त्वमनया तां विद्यां श्रयाऽऽश्रितो भवाङ्गीकुर्वित्यर्थः, तथा च तव मोक्षो भवेदित्यर्थः ॥ ४ ॥

दुग्धगुणवैलक्षण्यतोऽपि धात्रीतो जनन्याः श्रैष्ठ्यमविद्यायाश्च विद्यायामपि श्रैष्ठ्यं दर्शयति ।

निजमातुस्तनरसस्त्वद्वैतामृतवर्षणः ।
जन्मरोगजराध्वंसी सकृत्पीतोऽपि मृत्युजित् ॥५॥

निजमातुरिति । हे वाल निजमातुर्निजा स्वीया या माता जननी तस्याः स्तनरसः स्तनयोः कुचयो रस्यत आस्वाद्यात इति रसः पयः, तुर्धात्रीदुग्धाज्जननीदुग्धस्यातिवैलक्षण्यद्योतकः, तदेवाहाऽद्वैतामृतवर्षणो 'यन्नदुःखेन सम्भिन्नमि'त्यादिस्मृतिप्रतिपादितस्य स्वर्गसुखस्य नित्यनिरतिशयनिरुपमत्वप्रतीतेरद्वैतं निरुपमं यदमृतं सुखं स्वर्गसुखमित्यर्थः, तस्य च धर्माधीनत्वाद्धर्मस्य च सुबुद्धिजन्यत्वात्सुबुद्धेश्च कुजातिसम्पर्कपरित्यागेन स्वमातृदुग्धपानजन्यत्वात्परम्परयाऽद्वैतामृतस्य स्वर्गसुखस्य वर्षणः प्रापकोऽस्ति, किञ्च जन्मरोगजराध्वंसी जन्मैव दुःखदत्वाद्रोगः कुबुद्ध्या निषिद्धाचरणेन रोगो जायते जरा चाकालवार्धक्यं तयोर्ध्वंसी नाशकोऽस्ति सुबुद्धिजनकत्वेन रोगजरानाशक इत्यर्थः, किञ्च सकृत्पीतोऽपि सकृदेकवारमपि पीतः प्राशितो मृत्युजिन्मृत्युलोकस्य मृत्योश्च निवर्त्तको भवति स्वजननीदुग्धपानस्य सुबुद्धिजनकत्वेन तद्द्वाराऽमरत्वप्रापकत्वात्मृत्युलोकमृत्युनिवर्त्तकत्वं ज्ञेयं, प्रकृतार्थे तु निजमातुः

स्वीयसाक्षात्कारकारणभूतविद्यायाः स्तनरसः स्तन्येते ध्वन्येते अध्यारोपापवादौ यैस्ते स्तना उपनिषद्वाक्यानि तेषां रसः सुखं 'रसो वै स' इति श्रुतेर्वेदान्तप्रतिपाद्यं ब्रह्मसुखमित्यर्थः, तुपदेनाविद्यासुखाद्ब्रह्मसुखस्य वैलक्षण्यं सूचितं, सोऽद्वैतामृतवर्षणोऽद्वैतं भेदरहितं यदमृतं सुखं तस्य वर्षणो वृष्टिकर्त्ता भवति, किञ्च जन्मरोगजराध्वंसी जन्म सदद्वैतानृतद्वैतयोरैक्यप्रतीतिरूपं तस्याऽत एव रोगवार्धक्ययोरपि नाशकः, किञ्च स रसः सकृदपि एकवारमपि पीतः प्राशितः सन्मृत्युजिन्मरणनिवर्त्तको भवतीति ज्ञेयम् ॥ ५ ॥

नन्वेतावत्कालमेतयो र्भेदः कुतो न ज्ञातस्तत्राह ।

न ज्ञातं मूढभावेन पूर्वमन्तरमेतयोः ।
इदानीमन्तरं ज्ञात्वा निजमातुस्तनं पिब ॥ ६ ॥

नेति । उभयपक्षे भवता बालेन मुमुक्षुणा च मूढभावेन मोढ्येन पूर्वं प्रथमं मदुपदेशात्प्रागित्यर्थः, एतयोर्धात्रीमात्रोरविद्याविद्ययोश्चान्तरं वैलक्षण्यं न ज्ञातं न ज्ञानविषयीकृतमिदानीमधुना मदुपदेशेन कृत्वाऽन्तरं भेदं ज्ञात्वा साक्षात्कृत्वा निजमातुः स्वीयजनन्या विद्यायाश्च स्तनं स्तनस्थं दुग्धं स्तन्यत उपदिश्यते ब्रह्म येन स स्तनो ब्रह्मोपदेशकवाक्यसमूहस्तं च पिब प्राश्नीहि अङ्गीकुरु च एवमुभयत्र योज्यम् ॥ ६ ॥

ननु मद्धात्र्या जीवनं मत्कृततत्स्तनपाननिमित्तकाऽन्नवस्त्रादिप्राप्त्या भवति तत्स्तनपाने मया त्यक्ते तत्कथं स्यादिति तत्स्नेहेन तन्नाशमसहमानं प्रत्याह ।

त्वया स्तने परित्यक्ते सा विदीर्य म्रियेत चेत् ।
नश्येत्कुजातिसंसर्गो हितमेव तदा भवेत् ॥ ७ ॥

त्वयेति । हे बाल त्वया भवता स्तने धात्र्याः स्तने धात्री स्तनपाने इत्यर्थः, परित्यक्ते विसृष्टे सति सा धात्री विदीर्य जीवनचिन्तया कृशीभूय म्रियेत मृतिप्राप्नुयाच्चेद्यदि तर्हि कुजातिसंसर्गो नीचजातिसंपर्को नश्येन्नष्टो भवेत्तदा तर्हि धर्मेण स्वर्गादिसाधनबुद्धीच्छोस्ते हितमेवेष्टमेव भवेत्स्यात् । प्रकृतार्थस्तु त्वयेति । त्वया मुमुक्षुणाऽविद्यायाः स्तने शब्दे कर्मादिप्रतिपादकवाक्यजाते परित्यक्ते सर्वभावेन तत्फलवासनया सह विसृष्टे सति साऽविद्या विदीर्य कृशीभूय म्रियेत नश्येच्चेद्यदि तर्हि कुजातिसंसर्गः कुत्सितः संसारी जायते यया सा कुजातिरविद्या तद्वासना च तस्याः संसर्गः संपर्को नश्येन्नष्टो भवेद्यदा तर्हि मुमुक्षुत्वात्तव हितमेव मोक्षरूपमिष्टमेव भवेत्स्याद्, अविद्यानाशस्यैवमोक्षत्वप्रतिपादनादितिभावः ॥ ७ ॥

ननु कुजातिसम्पर्के मम काहानिरित्याशङ्क्य पूर्वमेव हानेरुक्तत्वाज्ज्ञानित्वेनाबाधकत्वं मत्वा वक्षि चेन्निष्फलत्वाच्च तदाश्रयस्येत्याशयेनाह ।

मायाब्रह्ममयस्तात किमर्थं वर्णसंकरः ।
मायामेव परित्यज्य शुद्धब्रह्ममयो भव ॥ ८ ॥

इति श्रीनरहरिकृतौ बोधसारे स्तनपानलीलाष्टकमेकत्रिंशम् ॥ ३१ ॥

मायाब्रह्मभय इति । हे तात हे पुत्र मायाब्रह्ममयो माया कापट्यं ब्रह्म च ब्राह्मणकर्म तयोर्विकाररूपः सङ्करोऽन्यजातिसंपृक्तब्राह्मणजातिरूप इत्यर्थः, अत एव वर्णसङ्करो वर्णस्य ब्राह्मणवर्णस्य सङ्करो भ्रष्टत्वं किमर्थं कस्मै प्रयोजनाय कर्त्तव्य इति शेषः, तर्हि किं कर्त्तव्यं तत्राह मायामिति, मायामेव कापट्यं नीचयोनिजन्यसङ्कररूपं परित्यज्य विहाय सर्वभावेन परित्यज्य शुद्धब्रह्ममयः शुद्धमन्यजात्यसंपृक्तं ब्रह्म ब्रा-

ह्मणजातिस्तन्मयः सा प्रधाना यस्य स तथोक्तो भवाऽऽस्व । प्रकृतार्थे तु हे तात हे शिष्य माया जगत्कारणभूता सदसद्भ्यामनिर्वचनीया शक्तिर्ब्रह्म च देशाद्यनवच्छिन्नं प्रत्यगभिन्नः परमात्मा तयोर्विकारभूतो वर्णसङ्करो वर्णयोः शुद्धाशुद्धयोः सङ्करो मेलनं मालिन्यमित्यर्थः, किमर्थः कोऽर्थः प्रयोजनं यस्यां क्रियायां त्वया क्रियत इति शेषः, जीवनस्यान्यथासिद्धत्वात्तत्संपर्कस्य च दोषरूपत्वेन दुःखजनकत्वाच्चेति न कर्त्तव्य एव स इति भावः, अतो मायामत्र जगज्जननशक्तिमेव परित्यज्य विहाय शुद्धब्रह्ममयः शुद्धं माययाऽस्पृष्टं ब्रह्म प्रत्यगभिन्नं तन्मयस्तद्रूपो भव स्याः, तथा सति उभयसंयोगरूपसंसारसङ्करो न स्यादिति भावः ॥ ८ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ स्तनपानलीलाष्टकार्थप्रकाश एकत्रिंशः ॥ ३१ ॥

अथाश्चर्यचतुष्टयी ।

एवं स्तनपानलीलानिरूपणमिषेण मायातत्कार्ययो रुचिं परित्याज्य शुद्धब्रह्मणि रुचिमुत्पाद्येदानीं तत्रैव स्थैर्यसम्पादनाय तत्स्वरूपज्ञानमपेक्षितमिति तत्स्वरूपं निरूपयितुमाश्चर्यचतुष्टय्याख्यं चतुश्श्लोकं प्रकरणमभिदधान आह ।

अथाश्चर्यचतुष्टयी ।

अथेति । अथ स्तनपानलीलाष्टकनिरूपणानन्तरमाश्चर्यचतुष्टयी आश्चर्यस्याश्चर्यरूपस्य ब्रह्मणो निरूपकत्वात्तत्सम्बन्धिनी चतुष्टयी चतुःश्लोकसमूहात्मकं प्रकरणं निरूप्यत इति शेषस्तदेव ब्रह्मण आश्चर्यरूपत्वं निरूपयति ।

अन्धः पश्यति सर्वं च पङ्गुर्याति पुरात्पुरम् ।
जडः कार्याणि कुरुते नीरसो रसमश्नुते ॥ १ ॥

अन्ध इति । अन्धश्चक्षुर्हीनः सर्वं घटादिजातं पश्यति अवलोकयति, ननु विषयावलोकनमन्धस्य विरुद्धं कथं सम्भाव्यमिति चेन्न 'पश्यत्यचक्षुरि'ति श्रुत्या ब्रह्मणोऽचक्षुष्ट्वेपि अवलोकयितृत्वप्रतिपादनात्तया च श्रुत्याऽचक्षुष्ट्वे प्रतिपादिते 'निष्कलं निष्क्रियमि'ति श्रुत्या च निरवयवत्वे च प्रतिपादिते तं विना जगदवलोकयितृत्वस्य 'नान्योतोस्तिद्रष्टे'त्यादिश्रुत्याऽसत्त्वप्रतिपादनाच्चैतन्यं विना जगदवलोकनासिद्धेश्चान्धस्य जगदवलोकयितृत्वमुक्तमविरुद्धं सम्भाव्यं, च पुनः पङ्गुः पादहीनः पुरात्पुरं पूर्वनगरात्पुरान्तरं याति गच्छति, ननु पादहीने गतिः कथं सम्भाव्येति चेन्न 'अपाणिपादो जवनो गृहीते'त्यादिश्रुतेर्ब्रह्मणः पादराहित्येपि गतिमत्त्वप्रतिपादनान्निष्कलं निष्क्रियं शान्तमि'ति श्रुत्या च निरवयवत्वप्रतिपादनाच्च निरवयवत्वेनापि ब्रह्मणः पादराहित्ये सिद्धे सत्यपि गतिमत्त्वप्रतिपादनाद्गन्तुरपि ब्रह्मणो भिन्नस्यासत्त्वप्रतिपादनात्पङ्गुत्वं गतिमत्त्वं च सिद्धं पुरमत्र शरीरं 'नवद्वारे पुरे देही'त्युक्तेः 'पुरमेकादशद्वारमि'ति श्रुतेश्च, परात्परमिति पाठे तु त्वंपदवाच्यार्थत्यागेन लक्ष्यार्थकूटस्थचिन्मात्ररूपिणो 'निष्कलमि'ति श्रुत्या निरवयवत्वप्रतिपादनात्पादराहित्येन पङ्गुत्वं स एव ब्रह्मणोऽभिन्नत्वज्ञानात्स्वस्य परात्कारणादव्यक्ताख्यात्परं ततो भिन्नं तस्य कल्पितत्वात्तदस्पृष्टं च परमात्मरूपं याति प्राप्नोतीत्यर्थः, यद्वा लोकप्रसिद्धपुरान्नगरात्पुरं नगरं याति प्राप्नोतीत्यर्थ एवास्तु तस्यापि गन्तुर्ब्रह्मणः पृथगसत्त्वेन ब्रह्मत्वाद्ब्रह्मणश्च 'निष्कलमि'ति निरवयवत्वप्रतिपादनाद'पाणिपाद' इति

श्रुत्या पादराहित्ये गतिमत्त्वप्रतिपादनात्पङ्गुत्वं गन्तृत्वं च सम्भाव्यमिति दिक्, आश्चर्यान्तरमाह जड इति, जडश्चैतन्यात्मनो विविक्तो जीवः कार्याणि कर्त्तव्यतया विहितानि कर्माणि कुरुत आचरति चैतन्याद्भिन्नस्य जाड्यं प्रसिद्धमेव तस्यैव कर्तृत्वमपि सर्वशास्त्रेषु प्रतिपादितं तदधिकारेणैव सर्वशास्त्रविधानाच्चात्मनेपदप्रयोगेण च कर्मफलमपि तन्निष्ठमित्यपि सूचितं, यद्वा चेत्यराहितत्वेन चिदात्मन एव जडत्वाज्जडत्वं कर्मकर्तुरपि ततः पृथगसत्त्वप्रतिपादनाज्जडत्वं कर्मकर्तृत्वं च सम्भाव्यम्, अस्मिन्नपि पक्षे कर्तृत्वजाड्ये ब्रह्मण्येव सर्वाधिष्ठानत्वात्सम्भाव्ये इति भावः, यद्वा जडो मायातत्कार्यरूपः प्रपञ्चो ब्रह्मविष्णुरुद्रादिरूपः कार्याणि कर्माणि उत्पत्त्यादीनि कुरुत आचरति 'तदेतज्जडं मोहमात्रमि'ति श्रुत्या मायाया जडत्वप्रतिपादनात्तत्कार्यस्यापि ब्रह्मादिप्रपञ्चस्य जडत्वं 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवती'ति श्रुत्या तस्या एव कर्तृत्वप्रतिपादनादात्मनेपदेन च कर्मफलं तन्निष्ठमेवेति ब्रह्मणः कर्तृत्वभोक्तृत्वराहित्यं सूचितमिति भावः, यद्वा मायातत्कार्ययोरुभयोरपि जडत्वात्तस्यास्तत्कार्यजीवेश्वरयोरपि ब्रह्मणोऽभिन्नत्वाद्यतो न भिन्नं तत्तदेवेति लोके शास्त्रे च प्रसिद्धेः परमात्मैव जडस्तं विना कर्त्तारं कार्यनिर्वाहायोगात्स एव कार्याणि आकाशादिब्रह्माण्डान्तानि तदादिपिपीलिकान्तानि च कुरुत उत्पादयति एवं जडे कार्यकारित्वमाश्चर्यमेवेति भावः, आश्चर्यान्तरमाह नीरस इति, रस्यत आस्वाद्यतेऽनेनेति रसना तद्रहित आत्मा रसं माधुर्यादिकमश्नुतेऽनुभवति 'नान्योतोस्ति द्रष्टे'त्यादिश्रुते रसयितुरात्मन पृथक्सत्त्वाभावप्रतिपादनान्नि'ष्फलमि'ति श्रुतेश्च निरवयवात्मत्वप्रतिपादनाच्च रसनारहितत्वेप्यात्मनो रसानुभवितृत्वं सम्भाव्य-

मिति भावः, यद्वा 'रसो वै स' इति श्रुते रसाः सुखानि विषयजन्यानि निर्गतानि निवृत्तानि यस्मात्स नीरसस्ततोपि रसयितुः पृथगसत्त्वप्रतिपादनान्नीरसत्वं रसानुभवितृत्वं चात्मन्येव सम्भाव्यमिति भावः ॥ १ ॥

अन्यान्यप्याश्चर्याण्याह ।

निश्चेता निश्चिनोत्य[१]न्तं विरक्तो भोगमश्नुते ।
सर्वस्पर्शविहीनोपि ब्रह्मसंस्पर्शमश्नुते ॥ २ ॥

निश्चेता इति । निश्चेता निर्गतं निवृत्तं चेतोऽन्तःकरणं यस्मात्स तथोक्त आत्मा सोऽन्तमतिक्रान्तमन्तान्नाशादित्यनन्तं प्रत्यगभिन्नं ब्रह्म निश्चिनोति निदिध्यासति स्वय'मश्रोत्रममनऽस्कमि'ति श्रुत्याऽऽत्मनो निर्मनस्कत्वप्रतिपादनाद्आत्मनश्च मनसः पृथगसत्वाचात्मनो निर्मनस्कत्वं तं विना च केवलमनसो पदार्थनिश्चयाऽशक्तेर्निश्चेतस आत्मन एव परमार्थनिश्चायकत्वं सम्भाव्यमिति भावः, अत्यर्थमिति पाठे तु अर्थं सत्त्वमतिक्रान्तमसज्जगन्निश्चिनोति असत्वेन निश्चयविषयीकरोतीत्यर्थः, अन्यदप्याश्चर्यमाह विरक्त इति, विषयाणां मिथ्यात्वादात्मनः परिपूर्णत्वाच्च विरक्तो रागरहित आत्मा तं विना च भोक्तृत्वासिद्धेः स एव भोगं भुज्यत इति भोगस्तं सुखदुःखाद्यनुभवमश्नुति प्राप्नोति अन्यदप्याश्चर्यमाह सर्वेति, सर्वस्पर्शविहीनोपि सर्वे समस्ता ये स्पर्शाः स्पृश्यन्ते काठिन्यादिविषया यैस्ते स्पर्शास्त्वगिन्द्रियाणि स्पृश्यन्ते त्वगिन्द्रियेणानुभूयन्त इति स्पर्शास्त्वग्विषयास्तैर्विहीनोपि रहितोपि आत्मेन्द्रियणां विषयाणां चात्मनः पृ-

---

१ निश्चिनोत्यर्थं ।

थगसत्त्वात्तत्संस्पर्शविहीनत्वमात्मनः सम्भाव्यं, स ब्रह्मसंस्पर्शी ब्रह्मणा देशकालवस्तुकृतपरिच्छेदशून्येन वस्तुना संस्पर्शमेवममश्नुते प्राप्नोतीति ॥ २ ॥

आश्चर्यान्तराण्यप्याह ।

सर्वाहारी निराहारमुदरे धारयत्ययम् ।
मुग्धो भुनक्ति पाण्डित्यं सिद्धान्तं वक्ति मौनवान् ॥ ३ ॥

सर्वाहारीति । सर्वाहारी सर्वस्य समस्तस्याहारः भोजनं विद्यते यस्य स तथोक्त आत्मा पृथगसत्त्वमेव जगत आत्मनो भोजनं कालरूपेण वा भोजनं समस्तजगतः सोयमात्मोदरे जठरे निराहारं निर्गतो निवृत्त आहारो भोजनं यस्मात्तद्यथा तथा धारयति स्थापयति सर्वद्वैतस्य मिथ्यात्वात्तदाहारस्यापि तथात्वान्निराहारत्वं ज्ञेयं, सर्वाहारत्वे च श्रुतिः, 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः, मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' इति, अन्यदप्याश्चर्यमाह मुग्ध इति, मुग्धो ज्ञेयस्यासत्त्वात्तद्विषयकज्ञानस्यापि तथात्वात्तदभावत्वेन मुग्धत्वमात्मनो ज्ञेयं, स आत्मा पाण्डित्यं पण्डितस्य भावः पाण्डित्यं वैदुष्यं समदृष्टित्वलक्षणं 'शुनि चैव श्वपाके च पण्डिताः समदर्शिन' इति भगवदुक्तेः, भुनक्ति पालयति अभ्यवहरति वा, अन्यदप्याश्चर्यमाह सिद्धान्तमिति, मौनवान्मौनी सिद्धान्तं वाचां विषयो नेति सर्ववेदान्तसिद्धान्तस्तं वक्ति ब्रूते 'अवचनेनैव प्रोवाच, सह तूष्णीं बभूवे'ति श्रुतेः, यद्वा वागिन्द्रियस्य मिथ्यात्वात्तद्रहितो मौन्यात्मा सः सिद्धान्तं सर्वशास्त्रसिद्धान्तनिर्णयं वक्तुरपि ततः पृथगसत्त्वात्स एव वक्ता इत्यर्थः ॥ ३ ॥

किं चान्यदप्याश्चर्यमाह ।

निर्वैरो जयमाप्नोति निष्कामः पूर्णकामताम् ।
सुप्तो जागर्त्ति विज्ञानी मृतोप्यमृतमश्नुते ॥ ४ ॥

इति श्रीनरहरिकृतौ बोधसारे आश्चर्यचतुष्टयी ॥ ३२ ॥

निर्वैर इति । समत्वात्स्वस्य द्वेष्यविषयमिथ्यात्वाच्च निर्वैरो निर्गतं निवृत्तं वैरं विरोधो यस्मात्स तथोक्त आत्मा जयं सर्वोद्योगफलरूपं मोक्षमाप्नोति लभते, आश्चर्यान्तरमाह निष्काम इति, काम्यविषयाणाममत्त्वात्स्वस्य च पूर्णत्वान्निष्कामो निर्गताः कामा यस्मात्स तथोक्तः स एवात्मा पूर्णकामतां पूर्णाः पर्याप्ताः कामा यस्य यस्मिन्वा स तथोक्तस्तस्य भावस्तत्ता तामाप्नोति 'सर्वान्कामान् समश्नुत' इति श्रुतेः, आप्तकामत्वादपीत्यर्थः, किं चान्यदप्याश्चर्यमाह सुप्त इति, विज्ञानी विज्ञानमात्मानुभवः स विद्यते यस्य स तथोक्तः पुरुषः सुप्तः प्रपञ्चस्य बाधितत्वेन तद्विषयकज्ञानस्यापि बाधितत्वादज्ञानत्वेन सुप्तत्वं स जागर्ति जाग्रद्विषयाननुभवति, यद्वा ।

'या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरि'ति भगवदुक्तेः, ॥

प्रपञ्चे सुप्तत्वं स्वरूपे जाग्रत्वं चेति सुप्ते जाग्रत्वं संभाव्यं, यद्वा जाग्रदवस्थावत एव विश्वस्य स्वस्वरूपे सुप्तत्वात्प्रपञ्चे जागरणं चेति सुप्ते जागृतिसम्भवः सम्भाव्यः, यद्वा लोकदृष्ट्या सुप्तस्यैव जाग्रत्त्वं तत्रापि अज्ञानानन्दवृत्तिपुञ्जोः सत्त्वेन जाग्रल्लक्षणसद्भावादित्यर्थः, अन्यदाश्चर्यान्तरमाह मृतोपीति, मृतोपि जीवत्वनाशं प्राप्नोति अमृतं न विद्यते मृतं मरणं यस्मिंस्तदमृतं ब्रह्माऽश्नुते प्राप्नोति, यद्वा लोकप्रसिद्ध-

मरणवानपि स्वाधारं ब्रह्मैव प्राप्नोति, यद्वेह लोके मृतोपि अन्यलोकेऽमृतं सुधामश्नुते प्राप्नोति पुण्येन कर्मणेत्यर्थः ॥ ४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपिकायामाश्चर्यचतुष्टय्यर्थप्रकाशो द्वात्रिंशः ॥ ३२ ॥

अथ तुरीयतुलसीपूजा ।

एवमाश्चर्यचतुष्टयीनिरूपणमिषेणाश्चर्यस्वरूपं ब्रह्म निरूप्येदानीं तत्साक्षात्कारवतस्तुरीयबुद्धिवृत्तिभिस्तत्पूजां निरूपयितुं तुरीयतुलसीपत्रपूजाख्यं षट्श्लोकं प्रकरणमभिदधान आह ।

अथ तुरीयतुलसीपत्रपूजा ।

अथेति । अथाश्चर्यचतुष्टयीनिरूपणानन्तरं तुरीयतुलसीपत्रपूजा तुरीया जाग्रदाद्यपेक्षया चतुर्थ्यात्मसाक्षात्कारवती बुद्धिः सैव तुलसी विष्णोर्जगद्व्यापकस्यात्मनः प्रियत्वात्तस्याः पत्राणि विशेषभावगर्भवृत्तयस्तैः पूजाऽर्चा तन्निरूपकत्वादस्य प्रकरणस्याप्येतदेव नाम निरूप्यत इति शेषः, तत्रादौ तन्निरूपणमेव प्रतिजानीते ।

तुरीयतुलसीपत्रैर्विष्णुपूजा निरूप्यते ।
प्रेमप्रधानभावेन शृङ्गाररसरूपिणी ॥ १ ॥

तुरीयेति । मया प्रेमप्रधानभावेन प्रेम्णः स्नेहस्य प्रधानो मुख्यो भावः सत्ता यत्र मयि तेन मया शृङ्गाररसरूपिणी शृङ्गारः शुचिर्यो रसो रूप्यते प्रकाश्यतेऽस्यां सा तथोक्ता तुरीयतुलसीपत्रैस्तुरीया स्वात्मसाक्षात्कारवती बुद्धिः सैव तुलसीव विष्णोर्जगद्व्यापकस्य विष्णोरात्मनः प्रियत्वात्तुलसी तस्याः पत्राणि वृत्तिविशेषास्तैर्विष्णुपूजा विष्णोर्जगद्व्यापकस्यात्मनः पूजाऽर्चा

ध्यानमित्यर्थः, लौकिकपक्षे विष्णुः प्रसिद्धस्तुरीयेव मुक्तिदा सुखदा च तुलसी शेषं समानम् ॥ १ ॥

तत्र गोपीवाक्यम्।

तत्रोभयलक्षणायां पूजायां गोपीवाक्यं गोपस्य स्त्री गोपी तस्या वाक्यं वचनम्।

प्रकृतेर्थे गा इन्द्रियाणि पातीति गोपी बुद्धिस्तस्याः वाक्यं वचनं, यद्वा गां महावाक्यरूपां वाणीं पाति रक्षतीति गोपी बुद्धिस्तुर्यस्वरूपा तस्याः शान्त्यादिसखीः प्रति वाक्यं वचनमिन्दं वक्ष्यमाणं ज्ञेयमित्यर्थः, तद्वाक्यमुदाहृत्य दर्शयति।

दृष्ट्या मया मधुरया कलितोऽधुनायं
यत्कामिनीजनमनोहरणो मुकुन्दः।
तं चिन्तयामि हृदये न सुखं गृहेस्मि-
स्तस्मिन्वने भवतु तेन सहैव वासः ॥ २ ॥

दृष्ट्येति। लोके तावदर्थो यः प्रसिद्धः कामिनीजनमनोहरणः कामिनीनां कृष्णेन सह भोगकामवतीनां गोपिकानां जनः समूहस्तस्य मनसो हरणो वशीकर्त्ता मुकुन्दो मुक्तिप्रदः श्रीकृष्णो मया राधाख्यया मधुरया सूक्ष्मप्रेमभावगर्भितया सुखरूपयेत्यर्थः, दृष्ट्या दृशाऽधुनेदानीमयं मत्पुरोवर्त्ती कलितो वशीकृतो दृष्टश्च तं साक्षादृदृष्टमेव श्रीकृष्णं हृदये मनसि चिन्तयामि स्मरामि अतो मम मेऽतः परमस्मिन्प्रत्यक्षे गृहे वेश्मनि तत्कृत्ये च सुखं शर्म न विद्यते तर्हीतः परं किमिच्छसीति चेत्तत्राह तस्मिन्निति, तस्मिन्यत्र दृष्टस्तत्रैव वने वृंदावने तेन श्रीकृष्णेन सहैव साकमेव वासः स्थितिर्भवतु अ-

स्तु इति प्रार्थयामीत्यर्थः। प्रकृतार्थे तु यः प्रसिद्धः 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादिश्रुतिषु कामिनीजनमनोहरणः कामोभिलाष आत्मसुखविषयकः स यासु विद्यते ताः कामिन्य आत्मस्नेहवृत्तयस्तासां जनः समूहस्तस्य मन आत्मविषयकसंशयरूपान्तःकरणवृत्तिस्तस्य हरणः स्वविषयकनिश्चयोत्पादनेन नाशकोऽत एव मुकुन्दो मुक्तिप्रदः परमात्मा मया तुर्याख्यया बुद्ध्या मधुरया स्वात्मसुखानुभववृत्त्या सूक्ष्मया च दृष्ट्या दृश्यते साक्षादनुभूयत आत्मा यया सा दृष्टिरहं ब्रह्मास्मीति प्रमा रूपा वृत्तिस्तयाऽयं प्रत्यक्षपरोक्षत्वरहितो भागलक्षणया कलितो ज्ञातः प्राप्तश्च, अतोऽधुनेदानीं व्यवहारसमयेपीत्यर्थः, अहं तुर्या बुद्धिस्तं ब्रह्माभिन्नं प्रत्यगात्मानमेव हृदये हरति सर्वं द्वैतमिति हृदयमपवादस्तमयते प्राप्नोतीति तत्तथोक्तं सर्वद्वैतापवादावधिकान्तःकरणवृत्तिस्तस्मिंश्चिन्तयामि ध्यायामि अत एवास्मिन्प्रत्यक्षे गृहे गृह्यते स्वात्मतयाङ्गीक्रियत इति गृहं शरीरं तन्निमित्तो व्यवहारश्च तस्मिन्सुखं शर्म मम न न विद्यतेऽत इतः परं तास्मिन्नुपनिषदुक्ते वने वनषणसम्भक्तौ—इति प्रकृतिकत्वाद्वनशब्दस्य सम्भजने जीवब्रह्मैक्यचिन्तन इत्यर्थः, मम चिदाभासविशिष्टतुर्याख्यबुद्धेस्तेन प्रत्यगभिन्नपरमात्मना सहैव साकमेव वासः स्थितिर्भवतु अस्तु इति प्रार्थयामीत्येवं भाव एवैकं पत्रमिति भावः॥ २॥

एवं निजेच्छां सख्यग्रे प्रकटीकृत्येदानीं कृष्णसंगात्पूर्ववृत्तान्तमनुस्मृत्य राधिका सख्यग्रे निरूपयति।

गोपालिकास्मि चतुरा न च मे मनीषा
देहाश्रिता त्रिविधगोरसवासना मे।
किम्वा विधेयमिति चिन्तयती स्थिताहं

तावद्बलान्मिलित एव मया मुकुन्दः ॥ ३ ॥

गोपालिकेति । अहं गोपालिकाऽऽभीरकुलोत्पन्ना ग्रामीणेत्यर्थः, अस्मि भवामि तथासत्यपि मे मम मनीषा बुद्धिः चतुरा चातुर्यवती न न विद्यते तत्रापि मे मम विविधगोरसवासना विविधोऽनेकप्रकारो दुग्धदधितक्रनवनीतादिरूपो गोरसस्तस्य वासना गन्धो देहाश्रिता देहे शरीरे श्रिताऽऽश्रिताऽस्ति एते सर्वे दोषाः श्रीकृष्णचित्तरञ्जने प्रतिकूला एव मयि सन्ति अतः श्रीकृष्णचित्तरञ्जने मया किं विधेयं किं कर्त्तव्यमित्येवं चिन्तयती चिन्तां कुर्वत्यहं राधिका यावत्कालं स्थिता स्थितवती तावत्तत्कालमेव मुकुन्दो मुक्तिप्रदो भक्तानां श्रीकृष्णो मया सह बलात्स्वेच्छयैव मिलितः प्राप्तः । प्रकृतार्थे तु तुरीया बुद्धिः स्वात्मसाक्षात्कारात्पूर्ववृत्तान्तं स्वस्या अनुस्मरन्ती शान्त्यादिवृत्तीः प्रत्याह गोपालिकेति । अहं बुद्धिः प्रपञ्चनिश्चयात्मिकावृत्तिर्गोपालिका गा इन्द्रियाणि पालयति रक्षति असौ गोपालोऽहङ्कारो मोहो वा तस्य स्त्री तद्भोगकरणत्वाद्गोपालिकाऽस्मि भवामि मोहसंबद्धाऽहङ्कारसंबद्धा वेत्यर्थः, अत एव मे मम मनीषा मतिश्चतुराऽऽत्मानात्मविवेचने कुशला न न विद्यते च पुनर्मे मम विविधगोरसवासना विविधोऽनेकप्रकारो गवामिन्द्रियाणां रसः सुखं तस्य वासनेच्छा देहश्रिता देहे लिङ्गदेहे श्रिता लग्नाऽस्ति तिष्ठति एतादृश्यामात्मसाक्षात्कारप्रतिकूलसामग्र्यां मयि विद्यमानायां साध्ये स्वात्मसाक्षात्कारे मया किं वा विधेयं किं कर्त्तव्यमित्येवं चिन्तयती विचारं कुर्वती यावत्कालपर्यन्तं स्थिता स्थितवत्यस्मि तावत्तत्कालमेव बलात्स्वयमेव मुकुन्दो मुक्तिप्रदः प्रत्यगभिन्न परमात्मा मया तच्चिन्तावत्या तुर्याख्यबुद्ध्या सह मिलित एव प्राप्तः साक्षादनु-

भूत इत्यर्थः, इतीदं द्वितीयं पत्रं ज्ञेयम् ॥ ३ ॥

इदानीं स्वस्याः कृष्णेन सह रतिमदृष्टवतीनामपि सखीनां स्मितमुखान्यवलोक्य तत्र कारणं चानिश्चित्य विस्मितमुखी राधिका प्रियसखीं प्रत्याह।

एकाकिनी बत गतास्मि वने निशीथे
कुञ्जे निलीय रमणस्य रसो गृहीतः।
चित्रं भजामि कलयामि न तत्र हेतुं
सर्वाः प्रसन्नवदना यदिमा वयस्याः ॥ ४ ॥

एकाकिनीति। हे सखि एकाकिन्येकलाऽहं राधिका निशीथेऽर्धरात्रे अर्धरात्रनिशीथौ द्वावि'त्यमरः' वने वृन्दावने गता याताऽस्मि बत हर्षेण ततस्तत्र कुञ्जे लताद्यावृतस्थाने 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः, निलीयान्तर्धाय लोकदर्शनाविषयीभूयेत्यर्थः, रमणस्य रतिसुखदातुः श्रीकृष्णस्य रस आनन्दो भोगसुखमिति यावद् गृहीतोऽङ्गीकृतस्तत्र श्रीकृष्णेन सह भोगसुखाङ्गीकारे यद्यस्मात्कारणादिमा एता मत्पुरो दृश्यमानाः सर्वाः समस्ता वयस्या मत्क्रीडासहायिन्यः सख्यः प्रसन्नवदनाः प्रसन्नं हास्यशोभितं वदनं मुखं यासां तास्तथोक्ताः सन्ति तं हेतुं कारणं न कलयामि न जानामि तासां मया सह गमनाभावे मत्कृतसम्भोगस्य तासामदर्शने च कुञ्जेन्तर्हितया मया कृष्णेन सह रतिसुखेङ्गीकृते चैतासां तज्ज्ञानं कथं संजातं तज्ज्ञानाभावे च सत्यपि मां दृष्ट्वैतासां मुखे स्मितं दृश्यतेऽतोऽत्र हेतुनिश्चयाभावे केवलं चित्रमाश्चर्यं भजामि सेवामि। प्रकृतार्थे तु इदानीं तुरीया स्वस्या ब्रह्मणा सहैक्यसुखानुभवे तदननुभवित्रीणां शान्त्यादिवृत्तीनां प्रसन्नतां लक्ष्यीकृत्य

तत्कारणं चानिश्चित्य विस्मितवती सविकल्पसमाधिवृत्तिं प्रत्याहैकाकिनीति। हे सखि 'ओं खं ब्रह्मे'ति श्रुत्या ब्रह्मणः खाभिधानेन प्रतिपादनात्सह खेन वर्त्तत इति सखी ब्रह्मणा सह वर्तमाना वृत्तिः सविकल्पसमाध्याख्या तस्याः सम्बोधने हे सखि, बतेति तस्या एव कोमलसम्बोधनात्मकमव्ययं हर्षार्थकं वा, एकाकिन्यसहायिन्यद्वितीयेत्यर्थः, भूत्वेत्यध्याहार्य, वने सम्भजनार्हे ब्रह्मणि वनधातोः सम्भजनार्थत्वात्तत्प्रकृतिको वनशब्दः, निशीथे गाढान्धकारतया विषयादर्शनमिव ब्रह्मण्यपि द्वितीयाऽदर्शनान्निशीथमिव निशीथं ब्रह्म तस्मिन्गता प्राप्ताऽस्मि भवामि 'या निशा सर्वभूताना'मिति भगवदुक्तेः, ततः कुञ्जे कुं कुत्सितं मायां तत्कार्यं च जयति वशीकरोतीति कुञ्जमीश्वरतत्त्वं तस्मिन्निलीय तदाकारतां प्राप्य, यद्वा कु क्षेत्रं बुद्ध्यादिकं जयति स्ववशतया स्वस्वकार्ये प्रेरयतीति कुञ्जं ब्रह्माभिन्नं प्रत्यगात्मस्वरूपं तस्मिन्निलीयैकीभूय कुः पृथ्वी सा यथा बीजस्यानेकरूपेणाविर्भूतिकारणा तद्वदात्मनानात्वप्रतीतिसाधना बुद्ध्यादिक्षेत्ररूपा कुशब्देन ग्राह्यात्र, रमणस्य रमयति सुखयति जगदिति रमणं ब्रह्म तस्य 'एष ह्येवानन्दयाती'ति, श्रुतेः, 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'त्यादिश्रुतेश्च रस आनन्दो 'रसो वै स' इति श्रुतेर्गृहीतोऽङ्गीकृतोऽनुभूत इत्यर्थः, तत्र मम ब्रह्म सुखानुभवे यद्यस्मात्कारणादेतासां शान्त्यादीनां लौकिकवृत्तीनां च मत्सहचारित्वाभावे सति मदनुभूतब्रह्मसुखस्य तासु प्रतीत्यभावे च सतीमा मम ब्रह्माकारायाः प्रकाश्यत्वेन दृश्यमाना वयस्था मत्समवयस्का विवेकसमय एव मत्सहितानां शान्त्यादिवृत्तीनामुत्पत्तेः शान्त्यादिवृत्तयः सर्वाः समाप्ताः प्रसन्नवदनाः प्रसन्नं निर्मलं रागादिहीनं वदनं 'चेतोमुख' इति

श्रुतेर्विषयभोगसाधनमग्रमेवात वदनं मुखं यासां तास्तथोक्ताः सन्ति तं हेतुं कारणमहं तुर्याख्या बुद्धिर्न कलयामि न जानामि किं च केवलं चित्रमाश्चर्यं भजामि सेवामि ममात्मसुखानुभवे सति मद्भिन्नानागेतासां कथमानन्दानुभव इति विस्मयामि केवलं तद्धेतुं न जानामीत्येवं भावस्तुर्याख्यतुलस्यास्तृतीयं पत्रं ज्ञेयम् ॥४॥

ननु श्रीकृष्णभोगजन्यं सुखं कीदृशं तत्कथयेत्याशङ्क्य तस्यानिर्वचनीयत्वनिरूपणपूर्वकं चिह्नैरेव तन्निरूपयति ।

किं वर्णयामि पुरतः किल कस्य वर्ण्यं
किं वर्णितेन सखि वर्णयितुं न शक्यं ।
अङ्गानि मे विगलितानि सहैव नीव्या
दष्टेऽधरे रतिरसे रतिनायकेन ॥ ५ ॥

किमिति । कस्य पुरतो यस्याग्रे वर्णनीयं तस्य तदनुभवाभावान्न कस्याप्यग्रे वर्णनीयमित्यर्थः, तथा कस्य वर्ण्यं वचनविषयं भवेन्न कस्यापीत्यर्थः, अनुभवितृवक्त्रोः क्रियाभेदेन कर्तृभेदादन्यानुभूतस्यान्येनकथनाशक्तेरनुभवित्रानुभूतस्य सुखस्य वक्तुर्वचनविषयत्वासम्भवादिति भावः, वर्णितेन श्रीकृष्णसंभोगजन्यसुखवर्णनेन कृतेनापि किं किं फलं न किमपि फलमित्यर्थः, अतो हे सखि हे आलि तत्सुखं वर्णयितुं वर्णनं कर्त्तुं न शक्यं न सामर्थ्यविषयमतः किं वर्णयामि कथं वर्णयामि न कथमपि वर्णयामीतियावद्, अत एव लक्षणेनैव तल्लक्ष्यमित्याशयेन श्रीकृष्णभोगसुखाविर्भावेऽस्यां लक्षणानि तत्कालीनान्याहाऽङ्गानीति, रतिनायकेन रतिसुखस्य पुरुषाधीनत्वाद्रतेर्मैथुनसुखस्य नायकः स्वामी श्रीकृष्णस्तेनाधरेऽधरोष्ठे दष्टे चुम्बिते सति ततो रतिरसे रतेर्मैथुनस्य रसः

सुखं तस्मिन्नाविर्भूत इति शेषः, मे मम नीव्याऽधरवस्त्र-बन्धेन सहैव साकमेवाङ्गानि हस्तपादादीनि विगलितानि शि-थिलानि जातानि एतेनैव लक्षणेन श्रीकृष्णेन सह रतिसुखं जानीहि न तु तद्वचनेन निरूपयितुं शक्यमिति भावः, प्रकृता-र्थेऽपि तुरीया बुद्धिः स्वसमीपवर्त्तिनीं सविकल्पसमाधिरूपां वृत्तिं प्रति ब्रह्मसुखानुभवस्यावर्णनीयत्वनिरूपणपुरःसरं तत्सुखं स्वानुभूतं स्वस्यां तच्चिह्नैर्लक्षयति किमिति। कस्य पुरतो न क-स्यापीत्यर्थः, ब्रह्मसुखाकारायाः मम द्वितीयाभावादिति भावः, तथा कस्य वक्तुस्तत्सुखं वर्ण्यं वर्णनविषयं भवेन्न कस्यापीत्यर्थः, 'यतो वाचो निवर्त्तन्त' इत्यादिश्रुत्या ब्रह्मसुखस्य वागविषयत्व-प्रतिपादना'न्नान्योऽतोऽस्ति द्रष्टे'त्यादिश्रुत्या वक्तुरप्यतः पृथगस-त्त्वप्रतिपादनाच्चेति भावः, अत एव किं वर्णितेन तद्वर्णनस्य प्र-लापत्वादुपहासास्पदेन तद्वर्णनेन कृतेनापि किं फलं न किम-पीत्यर्थः, व्यर्थश्रममात्रं तदिति भावः, अतो हे सखि तुर्यानुकू-ल्यान्मित्रत्वेन सविकल्पसमाधिमुद्दिश्य तुर्याख्यबुद्धिकृतं सम्बो-धनं योऽयं तत्सुखं वर्णयितुं वर्णनविषयीकर्तुं न शक्यं न सा-मर्थ्यविषयमस्ति अतः किं वर्णयामीत्युदासीनता वाक्प्रपञ्चे स्वस्याः दर्शिता ब्रह्मसुखानुसन्धानविरोधितया वाक्प्रपञ्च-स्येति दुःखरूपत्वेन निष्फलत्वेन चेति भावः, अतस्तच्चिह्नैनैव दर्शयति अङ्गानीति, रतिनायकेन रते रमणस्य सुखस्येत्यर्थः, नायकेन स्वामिना ब्रह्माभिन्नप्रत्यगात्मना 'एष ह्येवानन्दया-ती'ति श्रुत्या जगदानन्दयितृत्वप्रतिपादनात्सुखस्यात्माधीनत्वे-नात्मनस्तत्स्वामित्वमिति भावः, अधरे 'मनसैवेदमाप्तव्यमि'त्या-दिश्रुत्या वृत्तिव्याप्यत्वप्रतिपादनात्तस्या एव वृत्तेर्ब्रह्मणोऽधः-स्थितत्वात्तुर्याख्यबुद्धेर्मर्मांशत्वेनाधरत्वं तस्मिन्, यद्वा धरतीति

धरः प्रपञ्चधारकोऽविवेकांशस्तस्मिन्वष्टे सति नाशिते सति, वृत्तिपक्षे स्पृष्टे सतीत्यर्थः, स्वैक्ये सम्पादिते सतीति वा, ततो रतिरसे रते रमणस्य प्रत्यगभिन्नब्रह्मज्ञानलक्षणक्रीडाया रसे सुखे निरतिशयानन्द आविर्भूते सतीति शेषः, मे मम तुर्याख्य-बुद्धेर्नीव्या सहैवाधरवस्त्रबन्ध इव वस आच्छादन इति धा-तोर्वस्त्रशब्दनिष्पत्तेस्तस्य चाच्छादनार्थत्वेन शरीरस्याप्यात्मा-च्छादकत्वेन वस्त्रसादृश्यात्तस्यात्मनश्च सम्बन्धहेतुत्वादहङ्कार एव नीवी सादृश्यान्नीवीशब्देनात्र ग्राह्यस्तेन सहैव साकमेवा-ङ्गानि अनुभवित्रनुभवानुभवितव्याख्यानि त्रिपुटीरूपाणि वि-गलितानि नष्टानि अन्यानि प्रसिद्धानि शरीराणि च नष्टानि अनेनैव लक्षणेन तत्सुखमनुमेयमिति भावः ॥ ५ ॥

इदानीं स्वस्याः कृष्णेन सह सम्भोगे पूर्वसुकृतमेव कारणं निश्चित्य सख्यग्रे निवेदयति ।

> नन्वेतदेव सुकृतं फलितं मदीयं
> यत्कामिनीषु रसलंपट एष कृष्णः ।
> लक्ष्मीपतेरितरथा न भवेदकस्मा-
> दस्मासु गोपवनितासु कथाप्रसङ्गः ॥ ६ ॥

नन्विति । एतत्कृष्णेन सह भोगफलकं मदीयं ममेदं मदीयं मत्पूर्वकृतमित्यर्थः, सुकृतमेव पूर्वजन्मकृतं पुण्यकर्मैव फलितं श्रीकृष्णभोगरूपेण परिणतं नन्विति वितर्कयामि कुत इयत आह यदिति, यद्यस्मात्कारणादेष मत्पुरोवर्त्ती श्रीकृष्णो भूमानन्दरूपं ब्रह्मैवास्ति ।

> 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
> तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते' ॥

इत्युक्तेस्तस्य च निष्कामेष्वेव साक्षाद्दृश्यत्वोक्तेरस्माकं सर्वदा दृश्यमानः, किञ्च कामिनीषु कामवतीषु अस्मासु प्राकृतस्त्रीषु रसलम्पटो रमः सुखमस्मत्सम्भोगजन्यं सुखं तस्मिल्लम्पटो लुब्धोऽस्ति तस्मात्कारणादिति योज्यं, तदुक्तमेव व्यतिरेकेण द्रढयति लक्ष्मीपतेरिति, इतरथाऽन्यथाऽस्मत्सुकृतोदयाभाव इत्यर्थः, लक्ष्मीपतेरिति हेतुगर्भं विशेषणं स्त्रीलुब्धत्वं यदि श्रीकृष्णे यदि सम्भाव्यं तर्हि सर्वस्त्रीरत्नं लक्ष्मीस्तस्या ब्रह्मादिप्रार्थनीयत्वं प्रसिद्धं तथा सति तस्यास्तेषु चाञ्चल्यं प्रसिद्धं, तस्या एव श्रीकृष्णे स्थैर्यं दृश्यते शास्त्रेषु च लक्ष्मीपतित्वं चास्य प्रसिद्धं, किञ्चास्य तस्यामुदासीनत्वादपि तत्स्थैर्यमिति तस्य श्रीकृष्णस्याकस्माद्विना साधनानुष्ठानं तत्र हेतुर्गोपवनितासु गोपानामाभीराणां वनितासु स्त्रीषु अस्मासु राधिकाद्यासु कथाप्रसङ्गः कथायां वार्त्तायामपि प्रसङ्गः संबन्धो न भवेन्न स्यात् किं पुनर्वक्तव्यं सम्भोगप्रसङ्गो न स्यादिति तस्मात्पूर्वसुकृतमेव फलितमिति निश्चयः। प्रकृतार्थे तु तुर्या बुद्धिः स्वस्या ब्रह्मैक्याकारवृत्तिजन्यसुखानुभूवे पूर्वानन्तजन्मसम्पादितसुकृतमेव कारणं निश्चित्य सविकल्पसमाधिमेव पुरोवर्त्तिनी लक्ष्यीकृत्य तदग्रे निवेदयति नन्विति, एतत्स्वस्या जीवब्रह्मैक्यसुखाप्तिरूपमिदं मदीयं ममेदं मदीयं मयैवानन्तजन्मसु सम्पादितमित्यर्थः, सुकृतं पुण्यमेव सम्पादितं फलितं जीवब्रह्मैक्यभावज्ञानरूपेण तत्सुखावाप्तिरूपेण च परिणतं नन्वित्येवं निश्चिनोमि कुत इत्यत आह यदिति, एष मत्पुरः साक्षाद्दृश्यमानोऽयं कृष्णो ब्रह्मानन्दोऽस्ति।

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते'॥

इत्युक्तेस्तस्य तु निष्कामेष्वेवानुभूयमानत्वप्रसिद्धेरस्मासु अहंकारविशिष्टासु अत एव गोपवनितासु गा बुद्धिवृत्तीरात्मसत्त्वारोपेण पातीति गोपो बुद्धिवृत्तिपालकोऽहंकारस्तस्य वनितास्तद्भजनरता वयं तुर्याया अपि अहंकारसम्बन्धवत्त्वाद्गोपवनितात्वमन्यवृत्तिवदेव ज्ञेयं, वनधातोः सम्भजनार्थत्वाद्वनिताशब्दस्य च तत्प्रकृतिकत्वाच्चेतिभावः, तत्रापि कामिनीषु प्रारब्धशेषपर्यन्तं लोकविषयेच्छावतीषु निष्कामेष्वेव ब्रह्मसुखानुभवप्रतिपादनादिति भावः, यद्वा कामयितुं ब्रह्मसुखमर्थयितुं शीलं यासां तास्तथोक्तास्तासु स्वरूपसुखस्य नित्यप्राप्तत्वादपि तदिच्छापि तदनुभवे बाधकैवेति तत्कामवतीष्वपि तत्साक्षात्कारो दुर्लभ इति भावः, तदेव व्यतिरेकेण द्रढयति लक्ष्मीपतेरिति, इतरथाऽन्यथाऽस्मत्सुकृतफलोदयोन्मुखताभावे सतीत्यर्थः, लक्ष्मीपतेर्लक्ष्मीरत्र गुरुवाक्यस्थिता भद्रा ग्राह्या 'भद्रैषां लक्ष्मीर्निहिताधिवाची'ति श्रुतेस्तस्या मोक्षलक्ष्म्याः पतिः पालकः स्वामी परमात्मा तस्य मोक्षलक्ष्मीदातुः परमात्मनो गुरोश्चाकस्माच्छीघ्रं अस्मासु तुर्यादिनाम्नीषु गोपवनितासु बुद्धिवृत्तीरिन्द्रियाणि च पाति रक्षतीति गोपो महामोहोऽहङ्कारो वा तं वनन्ति सम्भजन्तीति गोपवनिता अज्ञानवृत्तयोऽहङ्कारसंबद्धाश्च तादृशीषु प्रारब्धपर्यन्तं सर्ववृत्तिष्वपीत्यर्थः, कथाप्रसङ्गः कथया वार्त्तया प्रसङ्गः संबन्धो न भवेन्नस्यात्तत्र किं वक्तव्यं साक्षादनुभवो न भवेदिति अतोऽत्र सर्वदा सर्ववृत्तिषु अस्माकमात्मानुभवेऽस्मत्सुकृतमेव कारणमिति निश्चेतिव्यमिति भावः॥६॥

इदानीमेतत्तुरीयतुलसीपत्रैरात्मानुसन्धानलक्षणे पूजने फलितमाह।

तुरीयतुलसीपत्रैर्वनमाली सुपूजितः।

अस्मिन्वने महामिष्टं यत्फलं तत्प्रयच्छति ॥ ७ ॥

इति श्रीनरहरिकृतौ बोधसारे तुरीयतुलसीपत्रपूजा त्रयस्त्रिंशी ॥ ३३ ॥

तुरीयेति। अधिकारिशरीरं प्राप्य पुरुषेण तुरीयतुलसीपत्रैस्तुरीयमिव मोक्षफलदात्री तुलसी तस्याः पत्राणि दलानि तैः कृत्वा वनमाली वनमालाऽऽपादलम्बिनी माला स्रग्विद्यते यस्य स श्रीकृष्ण 'आपादलम्बिनीं मालां वनमालां विदुर्बुधा' इति कोशोक्तेः, सुपूजितः सुष्ठु प्रेम्णा पूजितोऽर्चितश्चेद्यदि तर्हीत्यध्याहार्यम्, अस्मिल्लोकप्रसिद्धे वने कर्माद्युपासनान्तलक्षणे सम्भजने यन्महामिष्टं प्रसिद्धमत्यन्तसुखरूपं फलं सर्वजन्मकृतकर्मणामुपासनानां च फलत्वात्तदेवफलं प्रेमलक्षणं तत्प्रयच्छति ददाति। प्रकृतार्थे तु अधिकारिणा तुरीयतुलसीपत्रैस्तुरीयाऽऽत्मसाक्षात्कारवती बुद्धिरेव तुलसीव विष्णुप्रियत्वादात्मप्रियत्वाच्च तस्याः पत्राणीव तद्वृत्तय उक्तलक्षणास्तैर्वनमाली वनं तुर्यबुद्ध्याऽऽत्मानुसन्धानलक्षणं भजनं तेन मालाते शोभते इति वनमाली तुर्यानुभूतः परमात्मा सुपूजितो नैरन्तर्येणानुसन्धत्तश्चेत्तर्हि अस्मिन्काण्डत्रयवेदप्रसिद्धे वने कर्मोपासनाज्ञानलक्षणे सम्भजने यद्विवेकिप्रसिद्धं महामिष्टं निरतिशयसुखस्वरूपं मोक्षाख्यं फलं तत्प्रयच्छति ददाति ॥ ७ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ-
तुरीयतुलसीपत्रपूजार्थप्रकाशस्त्रयस्त्रिंशः ॥ ३३ ॥

अथ हेतुमालाहीरावली।

एवमात्मानुसन्धानरूपां तुरीयतुलसीपत्रपूजां निरूप्येदानीं ज्ञानवतां जन्माभावादिधर्माः शास्त्रेषु कथितास्तेषां हेतून्प्रतिपादयितुं तेषां बहुत्वेन च हीरकघटितमालेव कण्ठशोभा-

कारित्वाद्धेतुमालाहीरावल्याख्यं द्वाविंशतिश्लोकं प्रकरणं प्रारभमाण आह ।

अथ हेतुमालाहीरावली ।

अथेति । अथ तुरीयतुलसीपत्रपूजानिरूपणानन्तरं हेतुमालाहीरावली हेतूनां कारणानां माला स्रगेव हीरावली हीरकस्रगेतदाख्यं प्रकरणमित्यर्थः, निरूप्यत इति शेषः, ननु ब्रानिषु जन्माभावादिगुणाः श्रुत्युक्ताः सन्ति श्रुतीनां च सर्वप्रमाणाशिरोमणित्वात्तदुक्तेऽर्थे प्रामाण्यमेवातः किन्तदर्थहेतुविचारेणेत्याशङ्क्याह ।

श्रुतिप्रामाण्यसिद्धेऽर्थे हेतुभिः किं तथापि हि ।
अपूर्वरचानात्मत्वादलङ्कारो महान्यतः ॥ १ ॥

श्रुतीति । श्रुतिप्रामाण्यसिद्धे श्रुतीनां स्वतः प्रमाणभूतानां वेदवाक्यानां प्रामाण्यं प्रामाणिकत्वं सर्वप्रसिद्धं तेन चोक्ते कथितेऽर्थे पदार्थे आस्तिकानां सर्वेषामपि निश्चयारूढत्वाद्धेतुभिः कारणप्रश्नैस्तन्निरूपणैश्च किं किं प्रयोजनं न किमपीत्यर्थः, तथापि हेतुनिरूपणस्य निष्प्रयोजनत्वेपि हि यतोऽपूर्वरचनात्मत्वादस्य प्रकरणस्यापूर्वा पूर्वाचार्यैर्निरूपितत्वाभावात्संग्रहेण नोक्ता रचना घटना यस्याः सा तथा भूताऽऽत्मा स्वरूपं यस्य प्रकरणस्य तस्य भावस्तत्त्वं तस्मादस्य प्रकरणस्य निरूपणेन साफल्यमस्तीति भावः, हेत्वन्तरमाहालङ्कार इति, यतः कारणादिदं हेतुमालानिरूपणं तद्रचनं च कण्ठे धृतेऽधिकारिणां महात्मातिश्रेष्ठोऽलङ्कारो भूषणं भवेदतोस्य निरूपणं सफलमेवेति भावः, हेतुमाला निरूप्यत इति

---

१ हेतुमालायाः ।

वा पाठः, अतो हेतुमाला हेतूनां कारणानां माला स्रगिवैतत्प्रकरणं निरूप्यते प्रतिपाद्यत इत्यर्थः ॥ १ ॥

तत्रादौ ज्ञानिषु जन्माभावकथनस्य हेतुं दर्शयति।

जन्म नामासतः सत्ता जातसाक्षात्कृतिर्मुनिः।
सद्रूपतामेव गतस्तेन जन्म न विद्यते ॥ २ ॥

जन्मेति। असतोऽहंकारादेः सत्ता स्वात्मसत्तारोपेण सत्त्वप्रतीतिः स्वात्मतादात्म्यमित्यर्थः, जन्यं जननं नाम प्रसिद्धमस्ति तदुक्तं विद्यारण्यस्वामिभिः।

सदद्वैतेऽनृतद्वैते यदन्योन्यैक्यवीक्षणम्।
तस्यान्तकालस्तद्भेदबुद्धिरेव न चेतरः ॥ इति।

तथा सति जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृतिरद्वैतात्मसाक्षात्कारो यस्य स तथाभूतो मुनिर्मननवान्सद्रूपतां सतो ब्रह्मणो रूपमाकारस्तस्य भावस्तत्ता तां गत एव तेन हेतुना तस्य मुनेर्जन्म सदसदैक्यप्रतीतिरूपं जननं न विद्यते नास्तीति प्रतिपादितं श्रुतिभिरिति शेषः सर्वत्र कर्त्तव्यः ॥ २ ॥

इदानीं ज्ञानिषु मरणाभावप्रतिपादने हेतुं दर्शयति।

प्राप्तवानमृतं ब्रह्म जातसाक्षात्कृतिर्मुनिः।
अमृतं येन संप्राप्तं स मृतत्वं कथं व्रजेत् ॥ ३ ॥

प्राप्तवानिति। अमृतं न विद्यते मृतं मरणं यत्र तदमृतं ब्रह्म देशकालवस्तुकृतपरिच्छेदशून्यं वस्तु प्रत्यगभिन्नमात्मानमित्यर्थः, प्राप्तवाँल्लब्धवानत एव जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृतिर्मरणरहितात्मसाक्षात्कारो यस्य स तथोक्तो मुनिर्ज्ञान्यस्ति अतो हेतोर्येन मुनिनाऽमृतं मरणरहितं ब्रह्म संप्राप्तं लब्धं

निःसंशयमहमिति स्वात्मत्वेनाङ्गीकृतमित्यर्थः, स मुनिर्मृतत्वं मरणाभावं कथं केन प्रकारेण व्रजेत्प्राप्नुयात् ॥ ३ ॥

तत्रैव प्रकारान्तरेण हेत्वन्तरमाह ।

मृतिः शरीरसंत्यागो जातसाक्षात्कृतिर्मुनिः ।
शरीरं त्यक्तवान्पूर्वं मृतस्य मरणं किमु ॥ ४ ॥

मृतिरिति । मृतिर्लोकप्रसिद्धा शरीरसन्त्यागः शरीरस्य देहस्य सन्त्यागः सम्यक्त्यागो विसर्जनं प्रसिद्धा तथा सति जातसाक्षात्कृतिर्जातोद्भूता साक्षात्कृतिर्मरणरहितदेहाद्यतीतात्मसाक्षात्कारो यस्य स तथोक्तो मुनिर्ज्ञानी शरीरं देहं पूर्वलोकप्रसिद्धमरणात्प्रागेव त्यक्तवान्विसृष्टवानतो हेतोर्मृतस्य त्यक्तदेहस्य मरणं मृत्युः किमु किमिव कथमिव न कथमपि भवतीत्यर्थः, अतो ज्ञानिनो मरणं नास्तीत्युक्तं ज्ञेयम् ॥ ४ ॥

इदानीं ज्ञानिषु कर्तृत्वाभावोक्तेर्हेतुं दर्शयति ।

अहन्तया सहैवायं जातसाक्षात्कृतिर्मुनिः ।
कर्त्तृत्वमत्यजत्तस्मात्कर्मभिर्न स लिप्यते ॥ ५ ॥

अहन्तयेति । जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृतिरहङ्कारातीतात्मसाक्षात्कारो यस्य स तथोक्तो मुनिर्ज्ञान्ययं प्रकृतोऽहन्तया सहैवाहङ्कारेण साकमेव कर्तृत्वं कर्त्ता कर्मेन्द्रियैः सहितो विज्ञानमयस्तस्य भावस्तादात्म्यमत्यजत्त्यक्तवान्तस्माद्धेतोः स मुनिः कर्मभिः क्रियाभिर्न लिप्यते लिप्तो न भवतीति ज्ञेयम् ॥ ५ ॥

ननु कर्मभिर्ज्ञानिनां लेपो नास्तीत्युक्तं तत्र पापजनकैः कर्मभिर्लेपो माभूत्पुण्यकर्मभिस्तु स्यादेवेत्याशङ्क्य तैरपि ज्ञानिनां लेपो नास्तीति कथयन्तत्रापि हेतुं दर्शयति ।

स्वयमेव पवित्रात्मा जातसाक्षात्कृतिर्मुनिः।
न च पुण्यैः पवित्रोऽसौ तेन पुण्यैर्न लिप्यते ॥६॥

स्वयमेवेति। जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृतिरात्मसाक्षात्कारो यस्य स तथाभूतो मुनिर्ज्ञानी स्वयमेव स्वत एव पवित्रात्मा पवित्रः पावन आत्मा स्वरूपं यस्य स तथाभूतोऽस्ति असौ ज्ञानी पुण्यैः पुण्यकर्मभिः पवित्रः पावनो न च नैव भवेत्तेन हेतुना पुण्यैः पवित्रकर्मभिर्न लिप्यते न लिप्तो भवति स्वतः पवित्रस्य ज्ञानिनो न पुण्यकर्मकृतपवित्रत्वलेप इति भावः ॥ ६ ॥

ननु तर्हि पापैरेव लेपोस्तु ज्ञानिनस्तत्राह।

अत्यन्तशुद्धरूपोऽसौ जातसाक्षात्कृतिर्मुनिः।
तत्करोति पवित्रं यत्तेन पापैर्न लिप्यते ॥ ७ ॥

अत्यन्तेति। जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृतिरात्मसाक्षात्कारो यस्य स तथोक्तो मुनिर्ज्ञान्यसौ ज्ञान्यत्यन्तशुद्धरूपोऽत्यन्तमुत्कृष्टं शुद्धं निर्मलं रूपमात्मा यस्य स तद्विधोऽस्ति अतः यत्प्रसिद्धं शास्त्रविहितं कर्म शुद्धं निर्मलमस्ति तत्करोति आचरति तेन स्वतः शुद्धत्वेन हेतुना शुद्धकर्माचरणेन हेतुना च पापैः किल्बिषैर्न लिप्यते न लिप्तो भवति, यद्वा पापकर्मानाचरणं हेतुः शुद्धत्वे शुद्धत्वं च पापालेपे हेतुर्ज्ञेयः ॥ ७ ॥

इदानीं ज्ञानिषु हर्षाभावोक्तेर्हेतुं दर्शयति।

सहजानन्दरूपत्वाज्जातसाक्षात्कृतिर्मुनिः।
येन हृष्यति तन्नास्ति तस्मादेष न हृष्यति ॥ ८ ॥

सहजेति। सहजानन्दरूपत्वात्सहजः स्वाभाविको य आ-

नन्दो निरतिशयसुखं स एव रूपं यस्य स तथोक्तस्तस्य भावस्तत्त्वं तस्माद्धेतोर्जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृतिरानन्दात्मसाक्षात्कारो यस्य स तथोक्तो मुनिर्ज्ञानी येन पदार्थेन हृष्यति हर्षं प्राप्नोति तत्पदार्थजातं नास्ति न विद्यते ज्ञानिदृष्ट्या 'नेह नानास्ति किञ्चने'त्यादिश्रुत्या द्वैतजातस्य समस्तस्य बाधितत्वादिति भावः, तस्मात्स्वतः सुखरूपत्वादन्यस्य सुखकारणविषयस्यासत्त्वाद्धेतोश्चैव प्रकृतो ज्ञानी न हृष्यति हर्षं नाप्नोति स्वाभाविकानन्यरूपत्वं द्वैतासत्त्वं च हर्षाभावे हेतुद्वयं ज्ञेयम् ॥ ८ ॥

इदानीं ज्ञानिषु द्वेषाभावोक्तेर्हेतुं दर्शयति ।

नापकर्त्तुं क्षमः कश्चिज्जातसाक्षात्कृतेर्भवेत् ।
अपकर्त्तुरभावेन स तु न द्वेष्टि कंचन ॥ ९ ॥

नेति । जातसाक्षात्कृतेर्जातोत्पन्ना साक्षात्कृतिः स्वात्मसाक्षात्कारो यस्य स तथाविधस्तस्य मुनेर्ज्ञानिनोऽपकर्त्तुमपकारं कर्त्तुं क्षमः समर्थः कश्चित्कोऽपि न न विद्यते निर्विकारात्मस्वरूपत्वाज्ज्ञानिनोऽपकर्त्तुरपि पृथगसत्त्वाच्चापकर्तुरप्यात्मत्वाच्चेति भावः, अतोऽपकर्त्तुरभावेनापकारकारिणोऽसत्त्वेन हेतुना स तु ज्ञानी तु कञ्चन कमपि न द्वेष्टि नाप्रियं मनुते ॥ ९ ॥

इदानीं ज्ञानिनां शोकाभावोक्तेर्हेतुं सोपपत्तिकं दर्शयति ।

अप्राप्यमवशिष्टं किं जातसाक्षात्कृतेर्मुनेः ।
हानिर्नास्ति ततो हेतोर्न शोचति कदाचन ॥ १० ॥

अप्राप्यमिति । जातसाक्षात्कृतेर्जातोत्पन्ना साक्षात्कृतिः सर्वात्मसाक्षात्कारो यस्य तस्य मुनेरप्राप्यं न प्राप्तुं लब्धुं योग्यमप्राप्यमवशिष्टमुर्वरितं किं किं वस्तु अस्ति न किमपी-

त्यर्थः, सर्वात्मप्राप्त्यैव सर्वप्राप्तिसिद्धेरिति भावः, अतो हानिर्नाशो ज्ञानिनो नास्ति न विद्यते ततस्तस्माद्धेतोः कारणात्कदाचन कस्मिन्नपि समये न शोचति शोकं न करोति ॥ १० ॥

इदानीं ज्ञानिषु इच्छाभावोक्तेर्हेतुं दर्शयति ।

केनाप्येष प्रकारेण जातसाक्षात्कृतिर्मुनिः ।
ब्रह्म सर्वात्मकं प्राप्य न काङ्क्षति किमप्युत ॥ ११ ॥

केनापीति । एष प्रकृतो जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृतिः स्वात्मसाक्षात्कारो यस्य स तथोक्तो मुनिर्मननवान्सर्वात्मकं सर्वस्य द्वैतजातस्यात्मा तत्त्वं ब्रह्म देशकालवस्तुकृतपरिच्छेदशून्यं वस्तु प्राप्य लब्ध्वा केनापि प्रकारेण केनापि हेतुना किमपि किञ्चिदपि वस्तु न काङ्क्षति नेच्छति ॥ ११ ॥

इदानीं ज्ञानिषु भयाभावोक्तेर्हेतुं दर्शयति ।

न ह्यन्यो बलवान्कश्चिज्जातसाक्षात्कृतेर्भवेत् ।
यस्माद्बिभेति तन्नास्ति तस्मादेष बिभेति न ॥ १२ ॥

नहीति । जातसाक्षात्कृतेः जातोत्पन्ना साक्षात्कृतिर्निर्भयात्मसाक्षात्कारो यस्य तस्याऽन्यो द्वितीयः कश्चित्कोपि बलवान्बली न भवेन्न स्याद्धि प्रसिद्धमेतत्सर्वविवेकिषु यस्मात्पुरुषाद्व्याघ्रादेर्वा बिभेति ज्ञानी भयं प्राप्नोति तत्पुरुषजातं व्याघ्रादिकं वा नास्ति न विद्यते 'नेह नानास्ति किञ्चने'ति श्रुत्या सर्वस्य द्वैतजातस्य बाधितत्वादिति भावः, 'द्वितीयाद्वै भयं भवती'ति श्रुत्या द्वितीयस्य भयहेतुत्वप्रतिपादनाच्चात्मनोन्यस्य निर्बलत्वाच्चेति तस्माद्धेतोरेष ज्ञानी न बिभेति न भयं प्राप्नोति ॥ १२ ॥

इदानीं ज्ञानिषु विषादाभावोक्तेर्हेतुं दर्शयति ।

यदस्य कार्यं परमं जातसाक्षात्कृतेर्भवेत् ।
तत्सर्वमेव संसिद्धं न तस्मात्स विषीदति ॥ १३ ॥

यदिति । अस्य प्रकृतस्य जातसाक्षात्कृतेर्जातोत्पन्ना साक्षात्कृतिः स्वात्मसाक्षात्कारो यस्य तस्य मुनेर्ज्ञानिनो यत्सर्वशास्त्रेषु विद्वत्सु च प्रसिद्धं परमं श्रेष्ठं मुख्यमित्यर्थः, कार्यं कर्त्तव्यं साध्यमित्यर्थः, तत्कार्यं सर्वं समस्तमपि संसिद्धं फलितमेव न त्ववशिष्टं किञ्चिदपि कार्यमस्ति आत्मज्ञाने सर्वकर्मसंमाप्तेः, तदुक्तं भगवता ।

'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत' इति ।

तस्मात्सर्वकर्मफलभूतज्ञानोत्पत्तेर्हेतोः स ज्ञानी न विषीदति विषादं न प्राप्नोति ॥ १३ ॥

इदानीं ज्ञानिषु मानाभावोक्तेर्हेतुं दर्शयति ।

मान्यस्तु पद्मजादीनां जातसाक्षात्कृतिर्मुनिः ।
मानितो यदि लोकेन स तु मानं न विन्दति ॥ १४ ॥

मान्यस्त्विति । जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृतिर्ब्रह्मादिमान्यात्मसाक्षात्कारो यस्य स तथाविधो मुनिर्मननशीलो ज्ञानीत्यर्थः, पद्मजादीनां पद्मात्कमलाज्जात उत्पन्नः पद्मजो ब्रह्मा स आदिर्मुख्यो येषां विष्ण्वादीनां तेषां मान्यस्तु मानितुं योग्य एवास्ति स ज्ञानी लोकेन सामान्यजनेन यदि यर्हि मानितः पूजितस्तर्हि स तु ज्ञानी तु मानं पूज्यत्वाभिमानं न विन्दति न प्राप्नोति नाङ्गीकरोतीत्यर्थः, यथा सूर्यस्य स्वतः प्रकाशरूपस्य लोकैः पूजायां दीपोज्ज्वलने कृतेऽपि तत्प्रकाशानङ्गीकार इव ज्ञानिन आत्मरूपत्वेन ब्रह्मादि-

मान्यत्वस्य स्वतः सिद्धत्वाल्लोककृतपूजाऽन्यमानविकारानङ्गीकरणमिति भावः ॥ १४ ॥

इदानीं ज्ञानिनोऽपमानाभावोक्तेरपि हेतुं दर्शयति ।

मान्य एव सुरेन्द्राणां जातसाक्षात्कृतिर्मुनिः ।
न मानितो यदि जनैरपमानं न विन्दति ॥ १५ ॥

मान्य इति । जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृतिर्ब्रह्माद्विमान्यात्मसाक्षात्कारो यस्य स तथा भूतो मुनिर्ज्ञान्यात्मत्वात्सुरेन्द्राणां सुराणां देवानामिन्द्रा ईश्वरा ब्रह्मादयस्तेषां मान्य एव पूज्य एवास्ति अतो यदि यर्हि जनैः सामान्यलोकैर्न मानितो न पूजितस्तर्हि सोपमानमनादरं न विन्दति न प्राप्नोति ॥ १५ ॥

इदानीं ज्ञानिषु शत्रुमित्रयोः समदृष्टित्वोक्तेर्हेतुं दर्शयति ।

उपकारापकारौ हि जातसाक्षात्कृतेर्मुनेः ।
शक्यौ न केनचित्कर्त्तुं तुल्यो मित्रारिपक्षयोः ॥ १६ ॥

उपकारेति । जातसाक्षात्कृतेर्जातोत्पन्ना शत्रुमित्रत्वरहितात्मसाक्षात्कृतिर्यस्य तस्य मुनेर्ज्ञानिनो हि यस्मात्कारणादुपकारापकारावुपकारः कस्मिंश्चिदपि कार्ये साहाय्यमपकारश्च कस्मिन्नपि कार्ये प्रतिकूलता तौ केन चित्केनापि पुरुषेण कर्त्तुमाचरितुं न शक्यौ न सम्भाव्यावतो ज्ञानी मित्रारिपक्षयोर्मित्रं हितकारि अरिश्चाहितकर्त्ता शत्रुस्तयोः पक्षावनुकूलप्रतिकूलाचरणरूपौ तयोस्तुल्यः समः ॥ १६ ॥

इदानीं स्तुतिनिन्दाजन्यविकारानङ्गीकारोक्तेर्ज्ञानिषु हेतुं दर्शयति ।

गुणदोषदशातीतं जातसाक्षात्कृतिर्मुनिः ।

प्राप्तवान्परमं धाम तुल्यनिन्दास्तुतिर्हि सः ॥ १७ ॥

गुणेति । जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृतिर्गुणदोषरहितात्मसाक्षात्कारो यस्य स तथोक्तो मुनिर्ज्ञानी गुणदोषदशातीतं गुणाश्चोत्तमाः शौचादयो दोषाश्चाशौचादयो दैवासुरीप्रकृतिरूपास्तेषां दशा अवस्थाः शुचित्वाशुचित्वादिरूपास्ताभ्योऽतीतं विमुक्तमत एव परमं कार्यकारणातीतं धाम स्वरूपं प्राप्तवाँल्लब्धवान् हि यतः कारणात्स ज्ञानी तुल्यनिन्दास्तुतिस्तुल्ये निरर्थकत्वेन समे निन्दा गर्हा स्तुतिश्च प्रशंसनं च यस्य स तथोक्तो भवति ॥ १७ ॥

इदानीं ज्ञानिषु अनिकेतत्वोक्तेर्हेतुं दर्शयति ।

गेहादिममता नास्ति जातसाक्षात्कृतेर्मुनेः ।
तेनानिकेत इत्युक्तो यत्र सायंगृहो मुनिः ॥ १८ ॥

गेहादीति । जातसाक्षात्कृतेर्जातोत्पन्ना साक्षात्कृतिः स्वात्मसाक्षात्कारो यस्य स तथोक्तस्तस्य मुनेर्ज्ञानिनो गेहादिममता गेहं गृहमादि मुख्यं येषु पुत्रदारादिषु तेषु ममता मदीयत्वाभिमानो नास्ति न विद्यतेऽतो मुनिर्ज्ञानी यत्र यस्मिन्स्थाने सायं सायंकालो भवति तत्रैवेत्यध्याहार्यं गृहो गृहं मन्दिरं यस्य स तथोक्तो मतुबर्थेऽच्प्रत्ययः, भवति तेन हेतुनाऽनिकेतो न विद्यते निकेतं गृहं यस्य स तथोक्त इत्येवमुक्तः कथितः ॥ १८ ॥

इदानीं ज्ञानिषु निर्योगक्षेमत्वोक्तेर्हेतुं दर्शयति ।

अप्राप्तं प्राप्तवान्बोधं जातसाक्षात्कृतिर्मुनिः ।
स तु न क्षीयते तेन निर्योगक्षेम आत्मवान् ॥ १९ ॥

अप्राप्तमिति । जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृति-

निर्योगक्षेमात्मसाक्षात्कारो यस्य स तथोक्तो मुनिर्ज्ञान्य-प्राप्तं न प्राप्तो लब्धोऽप्राप्तस्तत्स्वरूपत्वाद्बोधं ज्ञानं प्राप्तवाल्लँ-ब्धवानप्राप्तप्राप्तेरेव योगशब्देन प्रतिपादनादिति भावः, स तु स बोधश्च न क्षीयते न विनश्यति तेन हेतुना प्राप्तपरिर-क्षणस्यैव क्षेमशब्दार्थत्वप्रतिपादनेनेत्यर्थः, आत्मवानात्मसाक्षा-त्कारवान्निर्योगक्षेमो निर्गतौ निवृत्तौ योगक्षेमचिन्ते यस्य स तथाविधोऽस्ति ॥ १९ ॥

ननु ज्ञानिनः स्तुतिनिन्दयोः समत्वे किं तत्स्तुत्या प्रयोजनं तत्रेत्याशङ्क्याह ।

समो यद्यपि सर्वत्र जातसाक्षात्कृतिर्मुनिः ।
तथापि तत्स्तावकस्य मम स्तुतिफलं महत् ॥ २० ॥

सम इति । जातसाक्षात्कृतिर्जातोत्पन्ना साक्षात्कृतिः स-मात्मसाक्षात्कारो यस्य स तथाविधो मुनिर्ज्ञानी यद्यपि यद्य-पि सर्वत्र स्तुतिनिन्दयोः सर्वपदार्थेषु च सम एकरूप एवाऽस्ति तथापि तथा सत्यपि तत्स्तावकस्य तस्य मुनेः स्तावकस्य स्तु-तिकर्तुर्मम मे स्तुतिफलं मत्कृतस्तवनस्य फलं पुण्यरूपं प्र-योजनं महच्छ्रेष्ठमस्ति मद्भावनयैव तत्सिद्धेः, तथा च श्रुतिः, 'उपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामि'ति ॥ २० ॥

इदानीमस्य प्रकरणस्य प्रयोजनकथनपुरःसरं कण्ठे धा-रणं विधत्ते ।

हेतुमालामयी धार्या कण्ठे हीरावली बुधैः ।
अपूर्वरचनात्मत्वादलङ्कारो महान्यतः ॥ २१ ॥

इति श्रीनरहरिकृतौ बोधसारे हेतुमालाहीरावली चतुस्त्रिंशा ॥ ३४ ॥

हेतुमालामयीति । बुधैर्विवेकिभिर्हेतुमालामयी हेतूनां

कारणानां माला पङ्क्तिस्तन्मयी तत्प्रचुरा हीरावली वज्रमणिस्रगियं कण्ठे गले धार्या धर्तुं योग्यास्ति कुत इत्यत आहापूर्वेति, यतः काणादपूर्वरचनात्मत्वादपूर्वाऽत्याश्चर्यरूपा रचना घटना सैवात्मा स्वरूपं यस्याः सा तथोक्ता तस्य भावस्तत्त्वं तस्मादयमेतत्प्रकरणरूपो महानतिश्रेष्ठोऽलंकारो भूषणं भवेदत एव तस्याः कण्ठे धारणं विहितमिति भावः ॥ २१ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ हेतुमालाहीरावल्यर्थप्रकाशश्चतुस्त्रिंशः ॥ ३४ ॥

अथ कैवल्यकुञ्चिका ।

इदानीं श्रीगुरुः परमकारुणिकत्वेन जिज्ञासुजनोद्धरणाय तेषामेव कैवल्यपदप्राप्तये कैवल्यकुञ्चिकाख्यं द्वात्रिंशच्छ्लोकं प्रकरणमारभमाण आह ।

अथ कैवल्यकुञ्चिका ।

अथेति । अथ हेतुमालाहीरावलीनिरूपणानन्तरं कैवल्यकुञ्चिका कैवल्यस्य मोक्षस्य कुञ्चिकाऽज्ञानकपाटोद्घाटनाय कारणत्वात्कुञ्चिकेव कुञ्चिकैतन्नामकं प्रकरणमित्यर्थः, निरूप्यत इति शेषः, तत्रादावेतत्प्रकरणश्रवणे शिष्यं संमुखीकरोति ।

कैवल्यकुञ्चिकां तात त्वं सम्यगवधारय ।
उद्घाटय कपाटं च बोधरत्नं करे कुरु ॥ १ ॥

कैवल्येति । हे तात हे शिष्य त्वं भवान्कैवल्यकुञ्चिकां कैवल्यस्य मोक्षस्य कुञ्चिकेव कुञ्चिकैतन्नामकं प्रकरणमित्यर्थः, सम्यग्दृढं यथा भवति तथाऽवधारय शृणु भरेत्यर्थः, सम्यग्धृत्वा

च किङ्कार्यं तदाहोद्घाटयेति, त्वं तया कैवल्यकुञ्चिकया कपाटं कं सुखं पाटयति आवृणोति तत्कपाटमज्ञानं, यद्वा कं सुखं पाटयति च्छिनत्ति तत्कपाटमहंकारस्तमुद्घाटय निवारय ततश्च बोधरत्नं बोधस्वरूपं रत्नं स्वयं प्रकाशरूपं ब्रह्म करे हस्तेऽपरोक्षमित्यर्थः, कुरु कर्त्तव्यमित्यर्थः ॥ १ ॥

एवं शिष्यं संमुखीकृत्य तत्रादौ दृष्टश्रुतानुभूतेषु सर्वपदार्थेषु पञ्चधा शकलीकरणं विधत्ते ।

दृष्ट्या श्रुत्याऽनुभूत्या वा यो यो भावः परिस्फुरेत् ।
तं भावमविलम्बेन पञ्चधा शकलीकुरु ॥ २ ॥

दृष्ट्येति । दृष्ट्या चक्षुषा श्रुत्या श्रवणेनाऽनुभूत्याऽनुभवेन वा यो यो घटः पटो वा पदार्थः परिस्फुरेत्प्रकाश्येत तं तं तमित्यावृत्तिः कार्या तं तं घटपटादिरूपं भावं पदार्थमविलम्बेन स्मरणादिस्फुरणासमकालमेव पञ्चधा पञ्चप्रकारं यथा भवति तथा शकलीकुरु खण्डभावेन सम्पादय ॥ २ ॥

तान्येव शकलानि पञ्च स्वयमेव कृत्वा दर्शयति ।

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्म रूपं मायारूपं ततो द्वयम् ॥ ३ ॥

अस्तीति । अस्ति विद्यत इत्येवं शकलमेकं, भाति प्रकाशत इति द्वितीयं शकलं, प्रियं सुखमित्येवं तृतीयं, रूपमाकृतिरित्येवं चतुर्थं, नाम तु नामापि वाचकशब्द इत्येवं पञ्चमोंशः, इत्येवमंशपञ्चकमंशानां शकलानां पञ्चकं पञ्चसमूहस्तत्रैवमंशपञ्चकं प्रदर्श्येदानीं तेषु मायाब्रह्मणोरंशान्विभज्य दर्शयति आद्यमिति, आद्यमादौ प्रथमं भवमाद्यमस्ति भाति प्रियमिति त्रयं त्रिकं ब्रह्मरूपं ब्रह्मणो रूपं स्वरूपं ज्ञेयं ब्रह्मणः

सच्चिदानन्दरूपत्त्वादिति भावः, ततोऽनन्तरं द्वयं द्विकं नामरूपसंज्ञं मायारूपं मायायाः सदसद्रूपशक्ते रूपं स्वरूपमस्तीति ज्ञेयम् ॥ ३ ॥

तत्र नामरूपाभ्यामस्पृष्टं ब्रह्म लक्षयितुं तयोरसत्त्वं दर्शयति।

नामरूपे तु नैव स्तस्तत्र हेतुं वदाम्यहम्।
नाम तु व्यवहारार्थं कल्पितं न तु वास्तवम्॥४॥

नामेति। नामरूपे तु नाम सर्वपदार्थानामभिधानं रूपं चाकारस्ते द्वे अपि तुपदेन ब्रह्मांशत्रयाद्विविक्तत्त्वं नामरूपयोः सूचितं ज्ञेयं, नैव स्तः सती नैव भवतः कुत इत्याशङ्क्य तत्र हेतुनिरूपणं प्रतिजानीते तत्रेति, तत्र नामरूपासत्त्वे हेतुं कारणमहं वदामि कथयामि तत्र प्रतिज्ञाते नामरूपासत्त्वहेतुनिरूपणे प्रथमं नाम्नोऽसत्त्वहेतुं प्रदर्शयति नाम त्विति, नाम तु रूपतो विलक्षणं विविक्तं सदभिधानं व्यवहारार्थं व्यवह्रियते व्याप्रियतेऽनेनेति व्यवहारो व्यापारः स एवार्थः प्रयोजनं यस्य तत्तथाभूतं कल्पितमारोपितं कल्पनया स्थापितमित्यर्थः, अस्ति न तु वास्तवं नैव सत्यं लोकेपि कल्पितस्य रज्जुसर्पादेरसत्त्वदर्शनादिति भावः ॥ ४ ॥

एवं नामासत्त्वे कल्पितत्वं हेतुं प्रदर्श्य तदेव द्रढयितुं तत्रैव हेत्वन्तरमाह।

घटो न घो नापि च टस्तावुभौ यत्त्वमाश्रितौ।
घः कण्ठ्यष्टश्च मूर्धन्यस्तावुभावपि नैकदा॥ ५ ॥

घट इति। घटो घटपदवाच्यो मृद्विकारः पृथुबुध्नोदराकारो दृश्यमानो न घो घकारो न न भवति च पुनष्टकारवर्णरूपोपि न न भवति अतो मृद्विकारे घकारटकारयो-

रदृश्यमानत्वात्तद्घटितनाम्नस्तत्र कल्पितत्वं निश्चेतव्यमिति भावः, तत्रैव हेत्वन्तरमाह तावुभाविति, यद्यस्मात्कारणात्तौ घकारटकारावुभौ द्वौ खमाकाशमाश्रितावाश्रित्य स्थितौ तयोर्वाग्रूपत्वाद्वाचश्चाकाशकार्यत्वादाकाशस्यापि शून्यरूपत्वात्तयोरपि तथात्वेनासत्त्वमितिभावः, तयोरपि स्वस्मिन्नेवासत्त्वेऽन्योन्योच्चारसमये व्यावृत्तत्वं दर्शयति घ इति, घः कवर्गीयो घवर्णः कण्ठ्यः कण्ठे गले भवः कण्ठ्यः कण्ठस्थानजन्योऽस्ति टश्च टकारोपि मूर्धन्यो मूर्ध्नि भवो मूर्धास्थानोत्पन्न इत्यर्थः, अत एव तौ घकारटकारावुभावपि द्वावपि एकदैकस्मिन्समये न न विद्येते तयोरन्योन्यत्राभावे विद्यमाने तद्घटितनाम्नोऽसत्त्वं स्वस्मिन्नपि सिद्धमिति भावः ॥ ५ ॥

उक्तं घटनामासत्त्वमन्यत्राप्यतिदिशति ।

> एवं नामानि सर्वाणि रूपमङ्ग विचारय ।
> घटस्तु पृथिवीरूपं सा जडा जलरूपिणी ॥ ६ ॥

एवमिति । एवमनेन प्रकारेण सर्वाणि समस्तानि ब्रह्मादिपिपीलिकान्तपदार्थानां नामानि अभिधानानि कल्पितानि ज्ञेयानि, एवं नाम्नोऽसत्त्वं प्रदर्श्येदानीं रूपस्यापि तथात्वं दर्शयितुं तच्छ्रवणे शिष्यमभिमुखीकरोति रूपमिति, हे अङ्ग हे शिष्य त्वमिदानीं रूपमाकारं विचारय वक्ष्यमाणविचारेण जानीहि तमेव विचारमभिनीय दर्शयति घट इति, घटस्तु नाम्नो विविक्तो घटपदवाच्यो घटः पृथुबुध्नोदराकारवान्दृश्यमानः पदार्थस्तस्य च तत्कारणभूतपृथिव्याः सकाशात्पृथगसत्त्वात्पृथिवीरूपं पृथिव्या भूमेरेव रूपमाकृतिरस्ति कार्यस्य कारणानन्यत्वादेवं सर्वत्र, सा पृथिवी जडाऽचिद्रूपाऽनेना-

प्रकाशरूपेण रूपस्यासत्त्वमुक्तं सर्वरूपोपलक्षणमेतत्सा पृथिवी जलरूपिणी जलमुदकमेव रूपमस्याः सा तथोक्ता जलकार्यत्वात्पृथिव्यास्तत्कारणभूतजलव्यक्तिभिन्नव्यक्त्यभावो ज्ञेय इति भावः, भूमेर्जलकार्यत्वे श्रुतिः 'अद्भ्यः पृथिवी'ति ॥ ६ ॥

ननु जलस्य शुक्लरूपत्वं प्रतीयते तदेव पारमार्थिकमस्तु नेत्याह ।

तेजसो जलमुत्पन्नं तद्वायोः स च खोद्भवः ।
खादि सर्वमहङ्कारात्स च प्रकृतिसम्भवः ॥ ७ ॥

तेजस इति । तेजसोऽग्नेः सकाशाज्जलमुदकमुत्पन्नं जातमस्ति तेजसो जलस्य पृथगसत्त्वं तत्कार्यत्वादिति भावः, तर्हि तेजस एव पारमार्थिकत्वमस्तु तत्राह तदिति, तत्तेजो वायोः सकाशादुत्पन्नं सम्भूतं तस्यापि वायुकार्यत्वाद्वायुव्यतिरिक्तं रूपं नास्तीति भावः, तर्हि वायोरेव पारमार्थिकत्वमस्तु तत्राह स चेति, स च वायुरपि खोद्भवः खादाकाशादुद्भव उत्पत्तिर्यस्य स तथोक्तोऽस्ति तस्यापि शून्यरूपाकाशतः पृथक्सत्त्वं नास्तीति भावः, तर्ह्याकाशस्यैव पारमार्थिकत्वमस्त्वित्याशङ्क्याह खादीति, खादि खमाकाशमादि प्रथमं यस्य तत्खादि सर्वं समस्तं जगदहङ्कारादहङ्कारतत्त्वादुत्पन्नमिन्द्रियाणि विषया देवाश्च भूतानि सर्वपदेन ग्राह्यास्ते सर्वे त्रिगुणात्माहङ्कारादुत्पन्ना अहङ्कारात्पृथक्सत्त्वं सर्वेषां नास्तीति भावः, तर्हि तस्यैव सत्त्वमस्तु तत्राह स चेति, स चाहङ्कारोऽपि प्रकृतिसम्भवः प्रकृतेः सर्वजगत्कारणभूतपरमात्मशक्तेः सम्भव उत्पत्तिर्यस्य स तथोक्तोऽस्ति अहङ्कारस्यापि प्रकृतिकार्यत्वान्न तस्य ततः पृथक्सत्त्वमिति भावः ॥ ७ ॥

ननु तर्हि प्रकृतेरेव सत्त्वमस्तु तत्राह ।

---

१ रूपमात्रो

गुणात्मा प्रकृतिर्माया माया मय्येव नास्ति सा ।
नामरूपे ततो न स्तोऽथास्तीत्यादि विचारय ॥८॥

गुणात्मेति । गुणात्मेति हेतुगर्भं विशेषणं प्रकृतिः सर्वजगदुपादानभूता परमात्मशक्तिर्गुणात्मा गुणाः सत्त्वरजस्तमोभिधास्तं आत्मा स्वरूपं यस्याः सा तथोक्ताऽस्ति तेषां च गुणानामन्योन्यव्याप्तत्त्वेनासत्त्वात्सा प्रकृतिर्माया स्वतोऽसद्रुपत्वेन मायाऽनिर्वचनीयाऽतः सा त्रिगुणसाम्यावस्थारूपा प्रकृतिर्मिथ्याभ्रमरूपाऽतः सा सच्चिदानन्दरूप आत्मनि मयि नास्त्येव नैव विद्यते ब्रह्माभिन्ने प्रत्यगात्मनि तस्या असत्त्वमेवेत्यर्थः, उक्तं नामरूपासत्त्वमुपसंहरति नामरूपे त्विति, ततस्तस्मात्कारणान्नामरूपे नामाभिधानं रूपं चाकारस्ते द्वे न स्तो न विद्यत इति सिद्धमिति भावः, एवं नामरूपासत्त्वं निरूप्येदानीं पूर्वांशत्रयविचारे शिष्यं प्रेरयति अथेति, हे शिष्य त्वमथ नामरूपासत्त्वविचारानन्तरमस्तीत्यादि अस्ति सत्त्वेत्येवं विभाग आदिर्यस्य तत्तथोक्तमस्तीत्यादित्रिकमित्यर्थः, विचारय विवेचय ॥ ८ ॥

तदेव शकलीकरणं स्वयमभिनीय दर्शयति ।

अस्ति सत्ता भाति चिच्च प्रियमानन्दलक्षणम् ।
सच्चिदानन्दरूपं तत्कैवल्यमवशिष्यते ॥ ९ ॥

अस्तीति । अस्ति सत्तेत्येवमंश एक स ब्रह्मणः सत्ता ज्ञेया, भातीत्यंशश्चिद्ब्रह्मणश्चेतनता ज्ञेया, प्रियं च प्रियमित्यंशोपि आनन्दलक्षणं ब्रह्मण आनन्दरूपत्वस्य लक्षणं चिह्नं ज्ञेयं, तत्सत्ता चितिः प्रियं चेत्यंशत्रयं सच्चिदानदरूपं सत्कालत्रयाबाध्यं चिच्चेतनमानन्दः सुखं चैतेतत्त्रयमभिन्नं रूपमाकृतिर्यस्य त-

त्वयोक्तं कैवल्यमखण्डैकरसं ब्रह्मावशिष्यते नामरूपबाधेनावशिष्टमनुभूयते ॥ ९ ॥

इदानीं सच्चिदानन्दलक्षणस्य ब्रह्मणो नामरूपतो विवेचनं यदर्थमुक्तं तदाह ।

समाधिस्तत्र कर्त्तव्यो ह्ययमर्थानुवेधितः ।
अथ शब्दानुविद्धं तु समाधिं कथयामि ते ॥१०॥

समाधिरिति । तत्र सच्चिदानन्दरूपे ब्रह्मणि समाधिरन्तःकरणवृत्तेः सच्चिदानन्दमात्राकारः परिणामः कर्त्तव्यः कार्यः, एवं लक्षणसमाधेः साध्यतां विधाय तद्भेदं दर्शयितुमुक्तसमाधेरभिधानमाहायमिति, अयमुक्तलक्षणः समाधिरर्थानुवेधितोऽर्थो रूपं तेनानुविद्धत्वादर्थद्वारा वानुविद्धत्वादर्थानुविद्धनामा समाधिर्ज्ञेयः, समाध्यन्तरं निरूपयितुं प्रतिजानीतेऽथेति, अथार्थानुविद्धसमाधिनिरूपणानन्तरं तु ततो विलक्षणं शब्दानुविद्धं शब्दद्वारानुविद्धः सिद्धस्तं समाधिं समाधानं ते तव कथयामि निरूपयामि त्वं शृण्विति शेषः ॥ १० ॥

तमेवाह पञ्चभिः ।

नित्य एवास्मि शुद्धोस्मि चिद्रूपोस्मि निरन्तरः ।
सहजानन्दरूपोस्मि न मे माया न मे मलः ॥११॥

नित्य इति । अहमहंपदलक्ष्यः कूटस्थचिद्रूपो नित्योऽविनाश्यस्मि भवामि 'अविनाशी वा अरेयमात्मा, नित्यो नित्यानां चेतनश्चेतनानां, नित्यं विभुं सर्वगतं सुसूक्ष्ममि'त्यादिश्रुतिभ्यः, अन्यथा नाशस्यापि साक्षिनित्यचैतन्यापेक्षसिद्धिकत्वात्तदसिद्धेस्तस्यापि सिद्ध्यायाऽस्मनित्यत्वमङ्गीकार्यमिति भावः, किञ्चाहमहंपदलक्ष्य आत्मा शुद्ध एवाऽस्मि भवामि अत एव

चिद्रूपश्चिच्चैतन्यं रूपं स्वरूपं यस्य स तथोक्तोऽहमहंपदलक्ष्य आत्माऽस्मि भवामि 'चेतनश्चेतनानामि'ति श्रुतेः, अचेतनस्याहङ्कारादेर्जगतस्तत्प्रकाशकं मां विना प्रकाशानुपपत्तेरिति भावः, किञ्च निरन्तरो निर्गतं निवृत्तमन्तरं भेदो यस्मात्स तथोक्तोऽखण्डैकरस इत्यर्थः, अहंपदलक्ष्य आत्माऽस्मि भवामि भेदकोपाधेरहङ्कारादिजगतः कालत्रयेप्यसत्त्वेनाखण्डैकरसत्वमात्मन्यङ्गीकार्यमिति भावः, किञ्च सहजानन्दरूपोस्मि सहजः स्वाभाविको य आनन्दः सुखं निरुपाधिक आनन्द इत्यर्थः, स एव रूपमाकृतिर्यस्य स तथाभूतोऽहमहंपदलक्ष्य आत्माऽस्मि भवामि मे मम प्रत्यगभिन्नब्रह्मरूपस्य माया जगज्जननसामर्थ्यरूपाशक्तिर्न न विद्यते तस्या मत्तः पृथक्सत्त्वाभावादिति भावः, किञ्च 'विज्ञानमानन्दं ब्रह्म, आनन्दो ब्रह्मेति व्यजानादि'त्यादिश्रुतेरन्यथा जगज्जीवनानुपपत्तेरानन्दरूपत्वमात्मनः सिद्धमिति भावः, आत्मानन्दाभावे जगज्जीवनानुपपत्तौ श्रुतिः 'कोह्येवान्यात्कः प्राण्याद्, यदेष आकाश आनन्दो न स्याद्, एष ह्येवानन्दयातीति' अत एव मे मम मलो रागादिरूपो न न विद्यते स तु अन्तःकरणस्यैवाविवेकिभिरात्मनि व्यर्थमारोप्यत इति भावः ॥ ११ ॥

स्वस्य स्वाधीनकतया जगत्सत्ताप्रदातृतत्संहारकत्वाभ्यामैश्वर्यमनुसन्धत्ते ।

अस्मिन्नसति सत्ता हि चिद्रूपेण मयार्पिता ।
उपसंहृत्य सत्तां तां स्वसत्तायामहं स्थितः ॥ १२ ॥

अस्मिन्निति । एतावत्कालं हि प्रसिद्धाऽस्मिन्प्रत्यक्षेऽसति जगति या सत्ता सद्रूपता सा चिद्रूपेण चिच्चेतनमेव रूपमात्मा यस्य तेन मयाऽर्पिताऽऽरोपिताऽऽरोपस्य चेतनाधीनता लोके प्रसिद्धेति भावः, अतस्तां सत्तां नामरूपात्मकजगदध्यस्तां स-

त्तामुपसंहृत्य जगतः पृथक्कृत्याऽहं सच्चिदानन्दस्वरूप आत्मा स्वसत्तायां स्वा स्वात्मरूपा या सत्ता सद्रूपता तस्यामेव स्थितो वर्त्तमानो ऽस्मि ॥ १२ ॥

इदानीमात्मनोऽसङ्गत्वं लक्ष्यीकरोति ।

विकृत्या विकृतिर्नाहं प्रकृत्या प्रकृतिर्न च ।
तथापि जातं मयि चेत्तर्हि जातमजातवत् ॥१३॥

विकृत्येति । अयमहंपदलक्ष्यश्चिदात्मा विकृत्या विकारेण कार्येणेत्यर्थः, विकृतो विकारं प्राप्तो न नास्मि पुनश्च प्रकृत्या कारणेन जगत्कारणेनाव्याकृतेन वा प्रकृतिः कारणमव्याकृतं वाऽहमात्मा न न भवामि एवं विकाररहिते मयि प्रत्यगभिन्ने ब्रह्मणि लोकदृष्ट्या जातं कार्यकारणरूपं द्वैतमुत्पन्नं चेद्यदि तर्हि तदा यज्जातमुत्पन्नमुत्पद्यमानस्याद्यन्तयोरसत्त्वेन मध्येप्यसत्त्वादजातवन्न जातं तत्त्वत उत्पन्नं न तदजातं यन्मृगतृष्णाजलादि तद्वन्मिथ्यैवेत्यर्थः ॥ १३ ॥

तस्याप्युपसंहारः स्वाधीन एवेत्याह ।

उपसंहर विश्वात्मन्निति यावद्वदाम्यहम् ।
उपसंहृतमेवेदं दृश्यते नैव तिष्ठति ॥ १४ ॥

उपसंहरेति । हे विश्वात्मन्विश्वस्यात्मा सत्ताप्रदस्तस्य संबोधने हे विश्वात्मंस्त्वं विश्वं जगदुपसंहर लीनं कुरु इत्येवं यावद्यत्कालपर्यन्तं वदामि कथयामि अहमहंपदलक्ष्य आत्मा तावत्तत्कालमेवेदं जगदुपसंहृतमेव लीनमेव दृश्यते प्रतीयते मदग्रे नैव तिष्ठति न स्थितिं प्राप्नोति एतादृश्युत्पत्तिसंहारयोः स्वाधीनता मयि विद्यत इति भावः ॥ १४ ॥

नन्वेतादृशशब्दानां स्वात्मानुसन्धायकत्वेन शब्दानुविद्धस-

माध्यनुकूलत्वेपि तेषां प्रामाणिकत्वाभावेनाश्रद्दधानस्य तन्न स्यादित्याशङ्क्य तेषां प्रामाणिकत्वोपपादनपूर्वं तदर्थचिन्तनेनोक्तसमाधिसिद्धिमाह ।

इत्याद्युपनिषद्वाक्यपदतात्पर्यचिन्तया ।
शब्दानुविद्धनामा हि समाधिर्जायते मुनेः ॥ १५ ॥

इतीति । इत्याद्युपनिषद्वाक्यपदतात्पर्यचिन्तयेति एवमुक्तानि वाक्यानि आदीनि मुख्यानि येषां तानि उपनिषदां वाक्यानि उपनिषण्णं समीपे प्राप्यत्वेन स्थितं श्रेयो मोक्षरूपं यासु ता उपनिषदः स्वतः प्रमाणभूता वेदशिरोभूता ईशाद्यभिधाः श्रुतयस्तासां वाक्यानि तेषां पदानि सर्वज्ञः सर्वान्तर्यामीत्यादीनि तेषां तात्पर्यमर्थोऽखण्डैकरस आत्मा तस्य चिन्तया ध्यानेन करणेन हि प्रसिद्धः प्रकृतः शब्दानुविद्धनामा शब्दानुविद्ध इति नामाभिधानं यस्य स तथाविद्धः समाधिर्वृत्तेर्ध्येयाकारपरिणामरूपं समाधानं मुनेरुक्तशब्दार्थमननवतो ज्ञानिनो जायते भवति ॥ १५ ॥

एवं समाधिद्वयं ससाधनक्रमं निरूप्येदानीं यदर्थं समाधिद्वयनिरूपणं तमुक्तसमाधिद्वयविलक्षणमुक्तसमाधिद्वयोपसंहारपूर्वकमाह ।

अर्थानुवेधितस्तूक्तस्ततः शब्दानुवेधितः ।
तावुभौ सम्यगभ्यस्य विशेन्निरनुवेधितम् ॥ १६ ॥

अर्थेति । तु प्रथममर्थानुवेधितोऽर्थानुविद्धनामा समाधिरुक्तः कथितस्ततोऽनन्तरं शब्दानुवेधितः शब्दानुविद्धनामा समाधिरुक्तः कथितो नाम तु व्यवहारार्थमित्यविना-ऽयमर्थानुवेधित इत्यन्तेन ग्रन्थसन्दर्भेण प्रथमः, द्वितीयस्तु अथ

बाह्यानुविद्धं त्वित्यादिना समाधिर्जायते मुनेरित्यन्तेन ग्रन्थेनोक्तौ ज्ञेयः, बाधुकलक्षणौ द्वौ समाधी सम्यग्दृढं यथा भवति तथा अभ्यस्याभ्यासेन स्वाधीनीकृत्य ततो निरनुबंधितमनुविद्धनामानं समाधिं विशेत्वविशेत् ॥ १६ ॥

पूर्वोक्तसमाधिद्वयस्य साधनत्वे निरनुविद्धसमाधेः साध्यत्वे च दृष्टान्तमाह ।

शर्करादि्वतयं धृत्वा प्रणवो लिख्यते यथा ।
समाधिद्वितयं धृत्वा प्रणवार्थोऽपि लिख्यताम् ॥१७॥

शर्करेति । यथा यद्वदनभ्यासवतो बालस्य प्रणवलेखने शर्कराद्वितयं शर्करयोः सूक्ष्मवर्तुलपाषाणयोर्द्वितयं युग्मं धृत्वा स्थापयित्वा प्रणव ओङ्कारो लिख्यते रेखाकारेण व्यक्तीक्रियेत तथा तद्वत्समाधिद्वितयं समाध्योरर्थानुविद्धशब्दानुविद्धसमाध्योर्द्वितयं युग्मं धृत्वाऽभ्यस्य प्रणवार्थोऽपि प्रणवस्योङ्कारस्यार्थो लक्ष्यार्थो निरनुविद्धसमाधिरूपोऽपि लिख्यतां ब्रह्माहमस्मीति स्वात्मसाक्षात्कारदृष्ट्यावनुभूयताम् ॥ १७ ॥

तस्मिंश्च सिद्धौ पूर्वसमाधिद्वयानुपयोगमपि दृष्टान्तेनाह ।

पटोः प्रणवलेखेषु ते हि नावश्यके यथा ।
समाधिद्वितयं तद्वत्प्रणवार्थपटोरपि ॥ १८ ॥

पटोरिति । पटोः प्रणवलेखने कुशलस्य प्रणवलेखेषु प्रणवस्यो- [illegible] लेखसमानि तेषु क्रियमाणेषु हि प्रसिद्धे ते शर्करे [illegible] न भवतो यथा यद्वत्तथा तद्वत्प्रणवार्थे- [illegible] खण्डैकरसरूप आत्मा तस्मिन्कु- [illegible] शले समाधिद्वितयमपि समाध्यो-

द्वितयं युग्ममपि अर्थानुविद्धशब्दानुविद्धनामकं नावश्यकमुपयोगि न भवति ॥ १८ ॥

एतत्प्रकरणविचारस्य फलमाह ।

निर्विकल्पसमाधाने निष्ठा सा बोधयोगिनः ।
कपाटोद्घाटने हेतुरियं कैवल्यकुञ्चिका ॥ १९ ॥

निर्विकल्पेति । इयं मदुक्ता कैवल्यकुञ्चिका कैवल्यकुञ्चिका नाम प्रकरणं कपाटोद्घाटने कं ब्रह्म पाटयति आवृणोतीति कपाटमज्ञानं तस्योद्घाटन उत्सारणे हेतुः कारणं भवति अतोस्य नामापि कैवल्यकुञ्चिकेति, अज्ञाननिवर्त्तकत्वमनिष्टनिवृत्तिरूपं फलमभिधायेदानीमिष्टप्राप्तिरूपं फलं प्रदर्शयितुं विशिनष्टि निर्विकल्पेति, बोधयोगिनो बोधो जीवब्रह्मैक्यज्ञानमेव योगः स्वात्मप्राप्तिसाधनं यस्य विद्यते तस्य सोक्तलक्षणा कैवल्यकुञ्चिका निर्विकल्पसमाधाने निर्विकल्पकसमाधौ निष्ठा स्थितिरेव फलतो ज्ञेया ॥ १९ ॥

एतस्या माहात्म्यमाह ।

रहस्यं हि रहस्यानां निधीनां परमो निधिः ।
युक्तीनां परमा युक्तिरियं कैवल्यकुञ्चिका ॥२०॥

रहस्यमिति । हि प्रसिद्धेयं कैवल्यकुञ्चिका कैवल्यकुञ्चिकानाम्नी प्रक्रिया रहस्यानां गोप्यानां मध्ये रहस्यं गोप्यमस्ति तत्र हेतुर्निधीनां निधीयन्ते स्थाप्यन्ते द्रव्याणि येषु ते तथोक्ता द्रव्यपूर्णभाण्डानि तेषां मध्ये परमः श्रेष्ठो निधिर्द्रव्यपूर्णं भाण्डं सदात्मद्रव्यपूर्णत्वादतिश्रेष्ठो निधिरित्यर्थः, किञ्च युक्तीनां युज्यते प्राप्यत आत्मा आभिस्ता युक्तयो योगास्तेषां मध्ये परमा श्रेष्ठा युक्तिर्योग इयं कैवल्यकुञ्चिका ज्ञेया ॥ २० ॥

एतस्याः प्रामाण्याय परम्परागतत्वं दर्शयति ।

वसिष्ठव्यासपद्धत्या शङ्कराचार्यमागता ।
सा पुनः शङ्कराचार्यैः करुणारसनिर्भरैः ॥ २१ ॥

वसिष्ठेति । वसिष्ठव्यासपद्धत्या वसिष्ठो ब्रह्मपुत्रो व्यासः पराशरपुत्रस्तावेव पद्धती मार्गौ ताभ्यां जातावेकवचनं, ततः शङ्कराचार्यमागता शङ्कराचार्य एव मार्गः पन्थास्तस्मादागता प्राप्ता केन क्रमेणेत्यत आह सेति, सा शङ्कराचार्य आगता पुनस्तदनन्तरं करुणारसनिर्भरैः करुणा दया सैव रसस्तेन निर्भरैः पूर्णैः शङ्कराचार्यैः सर्वेषां कल्याणकर्तृभिराचार्यैः श्रीमदाचार्यैः ॥ २१ ॥

अर्पितानन्दबोधेभ्यस्तत्क्रमेण बुधैर्धृता ।
अवधार्या विशेषेण सेयं कैवल्यकुञ्चिका ॥ २२ ॥

इति श्रीनरहरिकृतौ बोधसारे कैवल्यकुञ्चिका ॥ ३५ ॥

अर्पितेति । आनन्दबोधेभ्य आनन्दबोधनाम्ने शिष्यायार्पिता समर्पिता दत्तेत्यर्थः, ततो बुधैर्ज्ञानिभिस्तत्क्रमेण स उक्तो यः क्रमस्तेनानन्दबोधात्क्रमेणेत्यर्थः, धृता प्राप्ता सा परम्परया मम प्राप्ता मया तुभ्यमियं प्रत्यक्षा दत्ता हे शिष्य सेयं कैवल्यकुञ्चिका विशेषेणात्यादरेण त्वयाऽवधार्या स्वाधीनीकर्त्तव्या ॥ २२ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ कैवल्यकुञ्चिकार्थप्रकाशः पञ्चत्रिंशः ॥ ३५ ॥

अथ बुद्धिप्रशंसा ।

इदानीं मुमुक्षूणां मोक्षस्यैवेष्टत्वात्तस्य च ज्ञानाधीनत्वात्त

ज्ज्ञानं च यतो बुद्ध्यधीनमतो बुद्धावादरं विधातुं बुद्धिमाहात्म्य-निरूपकं बुद्धिप्रशंसानामकं चतुःश्लोकं प्रकरणमारभमाण आह ।

अथ बुद्धिप्रशंसा ।

अथेति । अथ कैवल्यकुञ्चिकानिरूपणानन्तरं बुद्धिप्रशंसा बुद्धेर्मतेः प्रशंसा स्तुतिरेतन्नाकं प्रकरणं निरूप्यत इति शेषः, तत्र तावदादौ सर्वलौकिकवैदिकव्यवहारस्य कारणत्वं बुद्धेरेवाह ।

> व्यवहारस्य सर्वस्य बुद्धिर्मूलं यथा भवेत् ।
> तद्वत्तु परमार्थस्य निदानं बुद्धिरेव हि ॥ १ ॥

व्यवहारस्येति । सर्वस्य संसारमोक्षकारणभूतो यो व्यवहारस्तस्य बुद्धिरेव मतिरेव मूलं कारणं यथा यद्वद्भवेत्स्यात्तथा तद्वत्परमार्थस्य मोक्षाख्यस्यार्थस्य तु अप्यर्थः, निदानमादिकारणं बुद्धिरेव मतिरेव हि प्रसिद्धमेतद्विवेकिनाम् ॥ १ ॥

ननु बोधरूपस्यात्मनो बुद्ध्यनपेक्षत्वात्कुतो बुद्धेर्महत्त्वमित्याशङ्क्य बुद्धिबुद्धस्यैवात्मनो बुद्धत्वं नाबुद्धस्येति बुद्धेरेव महत्त्वमित्याशयेनाह ।

> यद्बुद्धमप्यबुद्धं तद्बुद्ध्या बुद्धं न चेत्तदा ।
> बुद्ध्या बुद्धं तु यद्बुद्धं तन्नाबुद्धं कदापि च ॥ २ ॥

यदिति । यदात्मचैतन्यं चिन्मात्रत्वाद्बुद्धमपि बोधरूपमपि बुद्ध्याऽज्ञानमात्रनिवृत्तिफलयाऽहं ब्रह्मास्मीति प्रमाख्यया वृत्त्या बुद्धमज्ञाननिरासेन साक्षादनावृतं बुद्धं प्रकाशितं न चेन्न विद्यते यदि तदा तर्हि तदात्मरूपमबुद्धमज्ञातं भवति अज्ञातस्यात्मनः संसृतिकारणत्वान्न मोक्षसिद्धिरिति भावः, एवं बुद्धस्याप्यात्मनो

बुद्धत्वमनेनेन बुद्धेः श्रैष्ठ्यमभिप्रायेदानीं बुद्धिवृत्तेः क्षणिकत्वेन बुद्धिवृत्तिनाशे तदुत्पन्नबुद्धत्वनाशादपि पुनरप्यात्मनि संसरण-प्रसक्तिरित्याशङ्क्य तां निरस्यन्बुद्धिजन्यस्यात्मनि बुद्धत्वस्य नाशाभावनिरूपणेनापि तच्छ्रैष्ठ्यं दर्शयति यत्त्विति, यत्तु यदज्ञा-निप्रत्यक्षं बुद्धमात्मचिन्मात्रं बुद्ध्या बुद्धं बुद्ध्याऽज्ञाननिवृत्तिमात्र प्रयोजनयाऽहं ब्रह्मास्मीति प्रमावृत्त्या बृद्धमनावृतं प्रकाशितं चे-द्यदि तदनावृतमात्मचिन्मात्रमबुद्धमज्ञातं कदापि कस्मिन्नपि समये वृत्तिभावे तदभावे वा न भवेन्न स्याद्, एकवारं बुद्धिप्रका-शितस्यात्मचैतन्यस्य सर्वदा प्रकाशमानत्वेनापि बुद्धेरेव महत्त्वं तज्ज्ञेयमित्याशयः ॥ २ ॥

इदानीमनात्मबुद्ध्यात्मप्रकाशे ज्ञबुद्धौ चात्मप्रकाशे च बुद्धेरेव हेतुत्वेन श्रैष्ठ्यमाह ।

बुद्ध्या न बुद्धो यो बोधो द्वैतबोधबुधैरपि ।
बुद्ध्या बुद्धमिमं विद्धि बुद्धिसाक्षितया बुधैः ॥३॥

बुद्ध्येति । द्वैतबोधबुधैर्द्वैतस्य जगतो यो बोधो ज्ञानं कर्मो-पास्तिविषयं तस्मिन्ये बुद्धाः पण्डितास्तैः कर्तृभिर्बुद्ध्या कर्मो-पास्तिनिर्णायकप्रज्ञया करणभूतया यो विवेकिप्रत्यक्षो बोधश्चि-न्मात्र आत्मा स न बुद्धोऽपि न साक्षात्कृतोऽपि तमिममात्मान-मात्मनि बोधरूपं बुधैर्ज्ञानिभिर्बुद्धिसाक्षितया बुद्धेरहं ब्र-ह्मास्मीति वृत्तेः साक्ष्यव्यवधानेन प्रकाशक आत्मा तस्य भावः सत्ता तया बुद्ध्या मयैव बुद्धं ज्ञातं विद्धि जानीहि ॥ ३॥

इदानीमात्मबोधे केनापि प्रकारेणासाध्यमाने सत्यपि तत्र बुद्धेः कुशलतां दर्शयन्बुद्धेः श्रैष्ठ्यमाह ।

न बुद्धमपि यद्बुद्धं यच्च बुद्धमबुद्धवत्

बुद्धाबुद्धसमं बुद्ध्या बुद्धाबुद्धविलक्षणम् ॥ ४ ॥

इति श्रीनरहरिकृतौ बोधसारे बुद्धिप्रशंसा षट्त्रिंशी ॥ ३६ ॥

न बुद्धमपीति। यज्ज्ञानिप्रत्यक्षमात्मरूपं न बुद्धमपि चेत्स- रहितचिन्मात्ररूपत्वान्न ज्ञातमपि बुद्धं ज्ञानस्वरूपमस्ति तस्य ज्ञानरूपत्वाभावे जगज्ज्ञानानुपपत्तेः, तथा च श्रुतिः—'यदेष आ- काश आनन्दो न स्यात् को ह्येवान्यात्कः प्राण्यादि'ति, किञ्च यच्च यदपि आत्मरूपमबुद्धवद्बुद्धिविषयत्वाभावात्स्वयं प्रकाशमान- त्वाच्चाविज्ञातमिव बुद्धं प्रकाशमानं वस्तुतश्च बुद्धाबुद्धयो- र्ज्ञाताज्ञातयोः समं सदैकरूपं, यद्वा बुद्धाबुद्धयोर्ज्ञान्यज्ञानिनोः समं निर्विशेषं तथा च श्रुतिः ।

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानतामिति ॥

अत एव बुद्धाबुद्धविलक्षणं बुद्धं बुद्ध्या विषयीकृतमबुद्धं बुद्ध्या न विषयीकृतं ताभ्यां विलक्षणं स्वयं प्रकाशमानं बुद्ध्या मया बुद्धं ज्ञातमतो बुद्धेरेव श्रैष्ठ्यमिति भावः ॥ ४ ॥

इति श्रीन० शि० दि० वि० बो० बुद्धिप्रशंसार्थप्रकाशः षट्त्रिंशः ॥३६॥

अथ रङ्गलीलात्रयी ।

एवं बुद्धिप्रशंसां निरूप्येदानीं जीवन्मुक्ते जगत्प्रतीतेरबा- धकत्वप्रदर्शनाय रङ्गलीलात्रय्याख्यं त्रिश्लोकं प्रकरणमभिधा- स्यन्नाह ।

अथ रङ्गलीलात्रयी ।

अथेति । बुद्धिप्रशंसानिरूपणानन्तरं रङ्गलीलात्रयी रङ्गस्य लीलाऽनायासेन धारणारूपा तन्निरूपिका त्रयी त्रिश्लोकावय- वैतन्नामकं प्रकरणमित्यर्थः, निरूप्यत इति शेषः, तत्र ताव-

द्रव्यं यथा यादृग्रङ्गे निक्षिप्यते तादृशं रङ्गं स्वस्मिन्धारयति तथा हृदयमपि यादृशरङ्गे निक्षिप्यते तादृशं रङ्गं धारयतीत्याह।

रञ्जितं रञ्जनैश्चित्रैश्चित्रं जातं हृदम्बरम्।
रङ्गे निरञ्जने क्षिप्तं रङ्गं प्राप्तं निरञ्जनम्॥ १॥

रञ्जितमिति। रञ्जनै रञ्जयन्ति स्वसंपृक्तं द्रव्यमिति रञ्जनानि अन्तःकरणविचित्रताकारणभूता विषयाश्चित्रैश्चित्रयन्ति हृदयमिति चित्राणि जगत्पदार्थास्तैः कृत्वा रञ्जितं विचित्रितं सद्धृदम्बरं हृद्धृदयमेवाम्बरमाकाशं चित्रं विचित्रमनेकरूपमिति यावत्तज्जातं सम्पन्नं तन्मयेदानीमधुना निरञ्जने निरुपाधिके स्वतः सिद्ध इत्यर्थः, रङ्गे रज्यते प्रकाश्यते जगदनेनेति रङ्गः परमात्मा तस्मिन्निक्षिप्तं स्थापितं सन्निरञ्जनं निरुपाधिकं रङ्गं रञ्जकमात्मानमित्यर्थः, प्राप्तं लब्धं जातम्। लौकिकार्थे तावद्रञ्जनै रञ्जयन्ति विचित्रयन्ति वस्त्रादिकं तानि रञ्जनानि तैश्चित्रैश्चित्रयन्ति स्वसंसृष्टं द्रव्यं तानि रञ्जकद्रव्याणि तै रञ्जितं चित्रितं सद्धृदम्बरं हृद्धृदयमिवाम्बरं वस्त्रं चित्रं विचित्ररूपं जातं सम्पन्नं तन्मया निरञ्जने निरुपाधिके रङ्गे रञ्जके द्रव्ये स्वतः पीतादिद्रव्ये क्षिप्तं स्थापितं सन्निरञ्जनं निरुपाधिकं पीतादिकं रङ्गं रागं प्राप्तं लब्धं भवतीति॥ १॥

ततश्च किं जातं तदाह।

रङ्गं निरञ्जनं प्राप्तमिदानीं तु हृदम्बरम्।
रञ्जितं रञ्जनैश्चित्रैरपि रङ्गं बिभर्ति न॥ २॥

रङ्गमिति। तद्धृदम्बरं तु हृदयरूपमाकाशमपि निरञ्जनं निरुपाधिकं रङ्गं रज्यते प्रकाश्यते जगदनेनेति रङ्गः प्रकाशरूप आत्मा तं प्राप्तं लब्धं सदिदानीमधुना रञ्जनै रञ्जकैश्चित्रै-

श्चित्रसदृशैर्जगत्पदार्थैः परस्परविलक्षणै रञ्जितं संपृक्तमपि रङ्गं जगत्पदार्थसम्बन्धं न बिभर्ति न धारयति व्यवहारदशायां जगत्पदार्थसम्बन्धवत्प्रतीतमपि ज्ञानिहृदयं वास्तवं सम्बन्धं न धारयतीति भावः । लौकिकार्थे तावद्भुदम्बरं हृद्धृदयवद्दम्बरं वस्त्रं निरञ्जनं निरुपाधिकं गैरिकादिरञ्जनद्रव्यं प्राप्तं सदिदानीं तादृशरङ्गधारणानन्तरमस्मिन्काले चित्रैरनेकै रञ्जनै रञ्जकद्रव्यैरञ्जितमपि संपृक्तमपि रङ्गं रञ्जनं स्वस्मिन्न बिभर्ति न पूर्ववद्धारयतीति ॥ २ ॥

इदानीमेतत्प्रकरणार्थधारणां तद्विचारं च विधत्ते ।

रङ्गलीलाद्वयीमेतां तात चित्तेऽवधारय ।
रङ्गं परीक्ष्य धिया साञ्जनं च निरञ्जनम् ॥ ३ ॥

इति श्रीनरहरिकृतौ बोधसारे रङ्गलीलात्रयी सप्तत्रिंशा ॥ ३७ ॥

रङ्गलीलेति । हे तात हे शिष्य एतां मदुक्तां रङ्गलीलाद्वयीं रज्यतेऽनेनेति रङ्गः सोपाधिको निरुपाधिकश्च तस्यानायाससिद्धत्वाल्लीला क्रीडा तस्याः प्रतिपादनकर्त्री द्वयी श्लोकद्वयात्मकं प्रकरणं तां त्वं चित्ते चेतसि अवधारय संगृह्णीष्व ततश्च धिया बुद्ध्या साञ्जनं चाज्यतेनेनेत्यञ्जनमुपाधिस्तेन सहितं रङ्गं प्रकाशं निरञ्जनं निरुपाधिकं रङ्गं प्रकाशमात्मानात्मप्रकाशमिति यावत्तत्परीक्ष्यावलोकय ॥ ३ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ रङ्गलीलात्रय्यर्थप्रकाशः सप्तत्रिंशः ॥ ३७ ॥

अथ चन्द्रिकाचन्द्रचमत्कारचतुष्टयी ।

एवं रङ्गलीलात्रय्या जीवन्मुक्ते व्यवहारकाले जगत्प्रतीतावपि

बाधकाभावं प्रदर्श्येदानीं तदेव दृढीकुर्वञ्जगत्प्रकाशचैतन्यात्म-चैतन्ययोरभेदं दर्शयितुं चन्द्रिकाचन्द्रचमत्कारचतुष्टय्याख्यं च-तुःश्लोकं प्रकरणमारभमाण आह ।

अथ चन्द्रिकाचन्द्रचमत्कारचतुष्टयी

अथेति । अथ रङ्गलीलात्रयीनिरूपणानन्तरं चन्द्रिकाचन्द्र-चमत्कारचतुष्टयी चन्द्रिका कौमुदी चन्द्रश्च सोमस्तयोश्चमत्कारो व्यवहारकौतुकं चन्दयति आनन्दयति जगदिति चन्द्रो ब्रह्मा-भिन्नः प्रत्यगात्माऽऽनन्दरूपत्वात्तस्येयं चन्द्रिका ज्योत्स्ना जगत्प्रकाशिका चेतनेत्यर्थः, तस्याश्चन्द्रस्य च परमसुखरूपत्वा-ज्जगदानन्दयितुः परमात्मनश्च यश्चमत्कारो भेदे प्रतीयमानेप्य-भिन्नत्वाव्यभिचाररूपस्तस्य प्रतिपादयित्री चतुष्टयी श्लोकच-तुष्टयरूपा प्रक्रिया निरूप्यत इति शेषः, तत्र तावदादौ सर्वदा च-न्द्रचन्द्रिकयोरिवात्मचैतन्यजगत्प्रकाशचैतन्ययोर्वियोगाभावं प्र-तिपादयति ।

अचन्द्रे चन्द्रिका नास्ति न चन्द्रश्चन्द्रिकां विना ।
चन्द्रिकाचन्द्रसंयोगः कथं वा विनिवार्यताम् ॥ १ ॥

अचन्द्र इति । अचन्द्रे चन्दयति आनन्दयति सर्वं ज-गदिति चन्द्रो निरतिशयस्वयंप्रकाशानन्दरूप आत्मा स न भवतीत्यचन्द्रोऽनात्मा तस्मिन्घटादिजगत्पदार्थे चन्द्रिका जग-दानन्दयित्री जगत्प्रकाशिका चेतना च नास्ति न विद्यते विद्य-माना न स्यादित्यर्थः, एवं चेज्जगदान्ध्य प्रसङ्ग इति भावः, ततश्च जगत्प्रकाशान्यथानुपपत्त्या तदानन्दानुपपत्त्या चात्मनः स-त्त्वमङ्गीकर्तव्यं तथा सति चन्द्रचन्द्रिकयोरिवात्मचैतन्यजगत्प्र-काशचैतन्ययोरपि द्वित्वं स्यादित्याशङ्क्य चन्द्राच्चन्द्रिकाया इवा-

ऽऽत्मचैतन्याज्जगत्प्रकाशचैतन्यस्य पृथक् सत्त्वं निषेधति नेति, चन्द्रिकां कौमुदीं विना—ऋते चन्द्रः सोम इव चन्द्रिकां जगत्प्रकाशकचेतनामृते चन्द्र आनन्दरूप आत्मा न नास्ति एकसत्ताकत्वादुभयोरिति भावः, अतश्चन्द्रिकाचन्द्रसंयोगश्चन्द्रिकाया जगत्प्रकाशकचेतनायाश्चन्द्रस्य चात्मनः संयोग ऐक्यं कौमुदीचन्द्रयोरैक्यमपि कथं वा केन प्रकारेण विनिवार्यतां निषेध्यतां न कथमपीत्यर्थः ॥ १ ॥

ननु तर्हि चन्द्रिकाया जगत्प्रकाशकचेतनायाश्च कादाचित्कत्वं कथं प्रतीयते तत्राह ।

> विस्मृत्या चन्द्रिका नाप्ता स्मृत्याऽऽप्तेव तु चन्द्रिका।
> चन्द्रिकाचन्द्रतादात्म्यं केनाहो विनिवारितम् ॥ २ ॥

विस्मृत्येति । चन्द्रिका कौमुदी विस्मृत्या निद्रादिरूपविस्मरणेनात्मचेतनापि विस्मृत्याऽज्ञानरूपविस्मरणेन नाप्ता न दृष्टाऽननुभूता च कस्मिंश्चित्समये स्मृत्या स्मरणेन ज्ञानेन चाप्तेव प्राप्तेव प्रतीयते वस्तुतस्तु चन्द्रिकाचन्द्रसंयोगवियोगावात्मचैतन्यजगत्प्रकाशचैतन्यसंयोगवियोगौ चैकरूप्यान्न स्तस्तत्प्रतीतिस्तु भ्रान्तिविलसितमितिभावः, अतोऽहो शिष्य चन्द्रिकाचन्द्रतादात्म्यं चन्द्रिकायाः कौमुद्याश्चन्द्रस्य च सोमस्य तादात्म्यमैक्यमात्मनो जगत्प्रकाशचेतनायाश्चैकत्वमभिन्नरूपत्वमित्यर्थः, केन निमित्तेन पुरुषेण वा विनिवारितं विनाशितं न केनापीत्यर्थः ॥ २ ॥

इदानीं शिष्यस्य चन्द्रचन्द्रिकाभिन्नत्वे प्रतीतेऽपि जीवन्मुक्तेषु जगद्भानस्याप्यात्मभानत्वप्रदर्शने दृष्टान्तत्वेनाभिधानादस्य सप्रयोजनत्वं दर्शयति ।

त्वयाऽनुभूतमेवास्ति चन्द्रिकाचन्द्रकौतुकम्।
दृष्टान्तदर्शनायाङ्ग पुनस्तत्प्रकटीकृतम् ॥ ३ ॥

त्वयेति। त्वया भवता चन्द्रिकाचन्द्रकौतुकं चन्द्रिका जगत्प्रकाशरूपा चेतना चन्द्रश्चेश्वराहितचिदानन्द आत्मा तयोः कौतुकमभिन्नत्वे सत्यपि भिन्नत्वव्यवहारनिर्वाहरूपं कुतूहलमनुभूतं ज्ञातमस्त्येव विद्यत एव तर्हि पुनः किमर्थं तन्निरूपणं तत्राह दृष्टान्तेति, हे अङ्ग हे शिष्य पुनर्भूयस्तत्र दृष्टान्तदर्शनाय दृष्टान्तस्योपमानस्य दर्शनाय निरूपणाय ब्रह्मचित्तचैतन्ययोरभिन्नत्वं तच्चन्द्रिकाचन्द्रकौतुकमिषेण प्रकटीकृतं स्फुटमुक्तमतोऽस्य न निष्प्रयोजनत्वमिति भावः ॥ ३ ॥

इदानीं ब्रह्मचिच्चित्तचितोरनन्तत्वं चन्द्रिकाचन्द्रदृष्टान्ताद्वैलक्षण्येन दर्शयति।

तावती चन्द्रिका प्रोक्ता यावानेव हि चन्द्रमाः।
अनाद्यन्तस्तु चन्द्रोऽयमनाद्यन्तास्य चन्द्रिका ॥ ४ ॥

इति श्रीनरहरिकृतौ बोधसारे चन्द्रिकाचन्द्रचमत्कारचतुष्टयमष्टात्रिंशा ॥ ३८ ॥

तावतीति। हे शिष्य हि विद्वत्सु श्रुतिषु च प्रसिद्धश्चन्द्रमा चन्दयति आनन्दयति जगदिति चन्द्रमाः 'एष ह्येवानन्दयाती'त्यादिश्रुतेः परमात्मा यावानेव यत्परिमाण एवास्ति तावती तत्परिमाणा चन्द्रिका चेतना प्रोक्ता कथिता कियत्परिमाणश्चन्द्रो कियत्परिमाणा च चेतनारूपा चन्द्रिकेत्याशङ्क्याहानाद्यन्त इति, अयं विद्वत्प्रसिद्धश्चन्द्रः सकलजगदानन्दकरः परमात्मा तु लोकप्रसिद्धचन्द्राद्विलक्षणोऽनाद्यन्तो न विद्यते आदिः कारणमन्तश्च नाशो यस्य स तथोक्तोऽ-

स्ति अस्य परमात्मचन्द्रस्य चन्द्रिका तु जगत्प्रकाशकचेतन-
शक्तिरपि अनाद्यन्ता न विद्येते आदिरन्तश्च यस्याः सा तथोक्ता
ऽस्ति उभावप्यनन्ताविति भावः ॥ ४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ चन्द्रि-
काचन्द्रचमत्कारचतुष्टयार्थप्रकाशोऽष्टात्रिंशः ॥ ३८ ॥

अथाद्भुतशिरश्छेदपञ्चकम् ।

एवं ब्रह्मचैतन्यचित्तचैतन्ययोरभेदं प्रदर्श्येदानीं मोक्षसा-
धनेषु समस्तेषु मनोबाधलक्षणस्य साधनस्य श्रैष्ठ्यं दर्शयितु-
मद्भुतशिरश्छेदपञ्चकाख्यं पञ्चश्लोकं प्रकरणमारभमाण आह ।

अथाद्भुतशिरश्छेदपञ्चकम् ।

अथेति । अथ चन्द्रिकाचन्द्रचमत्कारचतुष्टयीनिरूपणानन्त-
रमद्भुतशिरश्छेदपञ्चकमद्भुतोऽत्याश्चर्यरूपो यः शिरश्छेदः सर्व-
प्राणिनां शिरश्छेदे मरणं जायत इति प्रसिद्धं यथा तथा
मनसो बाधे जगन्नाशसम्भवाज्जगतो मन एव शिरः शीर्षं
तस्य च्छेदो बाधस्तस्य निरूपकं पञ्चानां श्लोकानां समू-
हरूपं प्रकरणं निरूप्यत इति शेषः, तदेव प्रतिपादयितुं सर्व-
पदार्थेषु प्रत्येकं विरागविवेकरूपसाधनेभ्यो विश्वविस्मृतिरूप-
स्य श्रैष्ठ्यमाह ।

तत्तद्विचारवैराग्याद्वरिष्ठा विश्वविस्मृतिः ।
छेद्यस्य शिरसश्छेदः प्रत्यङ्गच्छेदनाद्वरः ॥ १ ॥

तत्तदिति । तत्तद्विचारवैराग्यात्तस्य तस्य घ-
टादिपदार्थस्य तत्तदाकारवृत्तेश्च तत्तद्द्रष्टृभोक्तुश्चेत्येवमादिस-
मूहस्य विचारो विवेकस्तत्तद्विषयं वैराग्यं च वैतृष्ण्यमनयोः

समाहारैकवचनं तस्मान्मोक्षसाधनभूता विश्वविस्मृतिर्विश्वस्य जगतस्तत्कारणस्य मनसश्च विस्मृतिः—'नेह नानास्ति किञ्चने'ति बाधपूर्वं विस्मरणं मोक्षसाधनमित्यर्थः, वरिष्ठा श्रेष्ठा तत्सम्भावयितुं दृष्टान्तमाह च्छेद्यस्येति । च्छेद्यस्य च्छेत्तुं योग्यस्य शिरसः शीर्षस्यच्छेदः कर्त्तनं प्रत्यङ्गच्छेदनात्प्रत्येकमङ्गानामवयवानां छेदनात्कर्त्तनाद्वरः श्रेष्ठः, अयं भावः, केन चित्तीव्रापराधेन कस्य चिद्वध्यस्य वधे राज्ञाऽऽज्ञप्ते सति तद्दृष्ट्या विना शिरश्छेदं मृत्योरसम्भवात् पृथक्पृथगङ्गछेदनान्मृत्युसाधनभूताच्छिरःकर्त्तनमेव मृत्युसाधनं श्रेष्ठमिव मुमुक्षोर्मोक्षसाधनभूतात्तत्तत्पृथक्पदार्थविवेकवैराग्याद्विश्वविस्मृतिलक्षणं मनोबाधं विना मोक्षासम्भवाद्विश्वोपलक्षितमनोबाधलक्षणसाधनस्यैव श्रैष्ठ्यं मुमुक्षुदृष्ट्येति भावः ॥१॥

वध्यस्स्य प्रत्यङ्गच्छेदने कृतेऽपि शिरश्छेदं विना मृत्यसम्भवात्प्रत्यङ्गच्छेदनवैय्यर्थ्यवन्मुमुक्षोः प्रत्येकं विषयवैराग्यविचारयोः कृतयोरपि विश्वविस्मृतिलक्षणमनोनाशं विना मोक्षासम्भावात्प्रत्येकं विषयविचारवैराग्ययोर्निष्प्रयोजनत्वमाह ।

प्रत्यङ्गच्छेदनेप्यस्य च्छेद्यमेव शिरो यदि ।

प्रथमं तच्छिरश्छिन्धि वृथा किं चेष्टयाऽन्यया ॥२॥

प्रत्यङ्गेति । हे शिष्य अस्य जगतः प्रत्यङ्गच्छेदनेपि अङ्गमङ्गं प्रतीति प्रत्यङ्गं तस्य च्छेदने विकर्त्तने कृते सत्यपि पृथक्पृथगङ्गानां त्रिपुटीलक्षणानां नाशे कृतेपीत्यर्थः, शिरः शिर इव जगज्जीवनकारणं मन एव तत्त्वज्ञानेन विशीर्यमाणत्वाच्च शिरस्तस्य जगतो नाशाय च्छेद्यमेव च्छेत्तुं विकर्त्तितुं योग्यमेव यदि यहि, तर्हि त्वं प्रथममादौ शीर्यते तत्त्वज्ञानाद्भिनश्यतीति शिरो मनो जगज्जीवनकारणत्वात्सर्वाङ्गेषु मुख्याङ्गं

शिर इव सप्तदशावयवेषु मध्ये मुख्यं मन एवेत्यर्थः, छिन्धि विकर्त्तयाऽन्यया पृथक्पृथक्त्रिपुटीलयलक्षणया वृथाचेष्टया निष्प्रयोजनचेष्टया व्यापृत्या किं किं फलं न किमपीत्यर्थः, ॥ २ ॥

ननु मुनीनां दयाशीलत्वं प्रसिद्धं तथा च मृत्युकारणभूते शिरश्छेदनप्रवृत्त्याऽतीवनिर्दयत्वप्रसिद्धेस्तां विहायाऽन्याङ्गच्छेदनप्रवृत्तौ किञ्चिद्दयावत्त्वाच्छिरश्छेदात्प्रत्यङ्गच्छेदने श्रैष्ठ्यमिव मनोनाशात्प्रत्येकत्रिपुटीलयस्यैव श्रैष्ठ्यमस्त्वित्याशङ्क्य शिरश्छेदस्य प्रत्यङ्गच्छेदनस्य च दुःखरहितशीघ्रमरणहेतुत्वेन दुःखहेतुत्वपूर्वं मृत्युहेतुत्वेन चातीव वैलक्षण्यमेवेति प्रत्यङ्गच्छेदाच्छिरश्छेदस्य श्रैष्ठ्यमिव दुःखमात्रकारणात्प्रत्येकं त्रिपुटीलयाद्विश्वविस्मृत्या मनोनाशस्यैव श्रैष्ठ्यं दर्शयति ।

दयाशीला हि मुनयो मुनेः सापि दयालुता ।
यच्छिनत्ति मनः शीर्षं विनाङ्गच्छेदवेदनाम् ॥३॥

दयाशीला इति । मुनयो मननशीला ज्ञानिन इत्यर्थः, दयाशीला दया कृपा शीलं स्वभावो येषां ते तथोक्ताः सन्ति हि प्रसिद्धमेतच्छास्त्रेषु तर्हि कथं निर्दयवज्जगज्जीवनहेतुमनःशीर्षच्छेदने प्रवृत्तिस्तत्राह मुनेरिति । मुनेर्विवेकिनः सापि सैव दयालुता दयास्वभावता सा केत्यत आह यदिति, मुनिरङ्गच्छेदवेदनां विनाऽङ्गानां त्रिपुटीलक्षणानामवयवानां छेदश्छेदनं विकर्तनमित्यर्थः, तस्य वेदनां यातनामृते मनः शीर्षं मन एव शीर्षं शिरच्छिनत्ति विकर्त्तयतीति यद्या सेति योज्यम्, अयं भावः—प्रत्यङ्गच्छेदजन्यदुःखस्य बहुत्वादकस्माच्छिरश्छेदे च तदभावान्मनःशिरश्छेदकर्त्तुर्मुनेरपि दयालुत्वसिद्धिरिति भावः ॥ ३ ॥

ननु विवेकिबुद्धौ तत्सिद्धावपि वध्यस्य शिरश्छेदने तद्दृष्ट्या तु तदसिद्धिरेवेत्याशङ्क्य तद्दृष्ट्यापि तत्सिद्धिं दर्शयति ।

सद्यो मम शिरश्छिन्धि मामित्याह मनो मम ।

मया सोढुं न शक्यन्ते प्रत्यङ्गच्छेददुर्दशाः ॥ ४ ॥

सद्य इति । वध्यपुरुष एवायमस्य प्रत्यङ्गं छेत्तव्यमिति राजाऽऽज्ञायां सत्यां प्रत्यङ्गच्छेदने दुःखबहुत्वं ज्ञात्वा वधकर्त्तारं बहुद्रव्यं दत्त्वा मम शिरः सद्य एव छिन्धीति वदति तद्दृष्ट्या प्रत्यङ्गच्छेदनं कर्त्तुः सकाशाच्छिरश्छेदकर्त्तरि दयालुत्वं स्फुरति यथा तथा मम मनोपि मे ज्ञानिनो मनोऽन्तःकरणं प्रत्यङ्गच्छेदने दुःखबाहुल्यं ज्ञात्वैव जगदाकारं मनो मम मे जगदाकारस्य मनसः शिरस्तत्त्वज्ञानेन विशीर्यमाणत्वाच्छिरोभूतं जगज्जीवनभूतं सङ्कल्पविकल्परूपं मनः सद्यः शीघ्रं छिन्धि विकर्त्तयस्वेव मां मुमुक्षुं तन्नाशकमाह कथयति । ननु जगदाकारस्य ते जीवनहेतुभूतसङ्कल्पविकल्पात्मकमनःशीर्षच्छेदने मरणहेतुभूते कुतो मां प्रेरयसीति पृष्टं मनो मां प्रति कथयामासेत्याह मयेति, मया जगदाकाररूपेण मनसा प्रत्यङ्गच्छेददुर्दशाः प्रत्यङ्गानां पृथक् पृथगङ्गानां त्रिपुटीरूपाणामवयवानामित्यर्थः, छेदो विकर्त्तनं तज्जन्या दुर्दशाः पीडाः सोढुं क्षन्तुं न शक्यन्ते तत्सहने नाहं समर्थ इत्यर्थः, अतः प्रत्येकमङ्गच्छेदने दुःखबहुत्वज्ञानाद्दुःखाभावेन तत्कालशिरश्छेदकर्त्तुर्दयालुत्वस्य वध्यपुरुषदृष्ट्या सिद्धिरिवानन्तत्रिपुटीलक्षणामङ्गानां प्रत्येकच्छेदनेन दुःखबहुत्वज्ञानाज्जगदाकारमनोदृष्ट्यापि तच्छीर्षभूतसङ्कल्पविकल्परूपमनोबाधकर्त्तारि मयि दयालुत्वसिद्धिरिति भावः ॥ ४ ॥

किंच वध्यस्य प्रत्यङ्गच्छेदने कृतेपि वधाभाववदनन्तचित्त

यथवानां कर्त्तनासम्भावात्तत्कर्त्तनेपि तन्नाशाभावाच्च शिरश्छेद इव जगच्छिरो मन एव च्छिन्नमित्याह।

असङ्ख्याश्चित्तजा भावा शक्याश्छेत्तुं क्रमात्कथम्।
चित्तमेतत्समाछिन्नमत एव मया मुने ॥ ५ ॥

इति श्रीनवबोधसारेऽद्भुतशिरश्छेदपञ्चकमेकोनचत्वारिंशम् ॥ ३९ ॥

असंख्या इति। हे शिष्य चित्तजाश्चित्तादुत्पन्ना भावा विकारा असङ्ख्या न विद्यते सङ्ख्या गणना येषान्ते तथाभूता अनन्ता इत्यर्थः, अत एव ते क्रमात्क्रमेण च्छेत्तुं विकर्त्तितुं शक्याः सामर्थ्यविषयाः कथं केन प्रकारेण भवन्ति न कथमपीत्यर्थः, हे मुने इति सम्बोधनेन त्वमप्येवं जानास्येवेति सूचितम्, अत एवास्मादेव कारणान्मया मनोनाशकत्रैतदिदं प्रत्यक्षं चित्तं मनः समाच्छिन्नं सम्यक्पुनरुत्पन्नं न स्याद्यथा तथाऽऽच्छिन्नं विकर्त्तितं यदि त्वं मोक्षमिच्छसि तर्हि त्वयापि सङ्कल्पविकल्परूपमनोनाश एव कार्य इति भावः ॥ ५ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपिकायामद्भुतशिरश्छेदपञ्चकार्थप्रकाश एकोनचत्वारिंशः ॥ ३९ ॥

अथ जातसाक्षात्कारं शिष्यं प्रति श्रीगुरोः प्रश्नामृतम्।

इदानीमुपदिष्टार्थस्य शिष्ये स्थिरतापरीक्षणाय स्वप्रश्नानुदाहर्त्तुं श्रीगुरुप्रश्नामृताख्यं नवश्लोकं प्रकरणमभिदधान आह।

अथ जातसाक्षात्कारं शिष्यं प्रति श्रीगुरोः प्रश्नामृतम्।

अथेति। अथाद्भुतशिरश्छेदपञ्चकनिरूपणानन्तरं जातसाक्षात्कारं जात उत्पन्नः साक्षात्कारः स्वात्मप्रत्यक्षं यस्य तं तथोक्तं शिष्यं प्रति शिष्यस्य प्रतियोगे द्वितीया श्रीगुरोः

श्रीगुरुकृतं कर्त्तरिषष्ठी प्रश्नामृतं प्रश्नानां पृच्छानाममृतं शिष्ये सुखाविर्भावकारणत्वादमृतमित्येतन्नामकं प्रकरणमित्यर्थः, निरूप्यत इति शेषः, तत्रादौ परमपदानुभवो जातो वा नेति पृच्छति ।

नित्यानुभूतमपि यन्नानुभूतत्वमागतम् ।
अनुभूतिरसस्पर्शैरनुभूतं परं पदम् ॥ १ ॥

नित्यानुभूतमिति । यत्प्रसिद्धं विदुषां नित्यानुभूतमपि स्वयं प्रकाशरूपत्वान्नित्यं सर्वदाऽनुभूतमनुभवरूपमपि भावे निष्ठा नानुभूतत्वं नानुभूतमनुभवविषयस्तस्य भावस्तत्त्वं कर्मणि निष्ठा नागतं न प्राप्तमवेद्यत्वात्तदुक्तलक्षणं परं कार्यकारणातीतं कार्यकारणयोस्तत्रैव कल्पितत्वेनासत्त्वादित्यर्थः, पदं पद्यते श्रुतियुक्त्यनुभवैर्गम्यते तत्पदं प्रत्यगभिन्नं ब्रह्मानुभूतिरसस्पर्शैरनुभूतेरनुभवस्य यो रसः सुखविशेषस्तस्य स्पर्शाः साक्षात्कारास्तैस्त्वया कर्त्राऽनुभूतं साक्षात्कृतं किं किमु न वेति एकः प्रश्नः ॥ १ ॥

इदानीं प्रत्यगात्मनि ब्रह्मलक्षणानि साक्षात्कृतानि न वेति पृच्छति ।

प्रत्यक्षलक्षणैरेव पराग्वृत्तिविलक्षणैः ।
साक्षात्कृतः शिवः साक्षात्सच्चिदानन्दलक्षणैः ॥२॥

प्रत्यक्षलक्षणैरिति । हे शिष्य त्वया पराग्वृत्तिविलक्षणैः पराग्बहिरञ्चन्ति गच्छन्तीति पराञ्च्यो बहिर्मुखा यो वृत्तयोऽन्तःकरणस्य घटाद्यनुभवकरणरूपा अंशास्ताभ्यो विलक्षणैरविषयभूतैर्विगतानि लक्षणानि चिह्नानि स्वलक्षकानि येभ्यस्तैः प्रत्यक्षलक्षणैः प्रत्यक्षाणि अव्यवहितप्रकाश-

रूपाणि लक्षणानि चिह्नानि येषां तानि तैस्तेषां स्वयं प्रकाशत्वेन सर्वदास्फुरणरूपत्वात्तत्प्रासक्ष्यं सर्वत्र सर्वदानुभूयमानमिति भावः, सच्चिदानन्दलक्षणैः सत्कालत्रयाबाध्यं चिज्ज्ञप्तिमात्रमानन्दः सुखमेतान्येवाभिन्नानि ब्रह्मणो लक्षकत्वाल्लक्षणानि तैः साक्षाच्छिवोऽव्यवहितप्रकाशरूपः शिवः सुखरूपस्त्वंपदलक्ष्यः प्रत्यगात्मा साक्षात्प्रत्यक्षमनुभूतः किमिति पूर्वश्लोकादावर्त्तनीयं किं किमु नवेति प्रश्नः ॥ २ ॥

इदानीं वेदान्तश्रवणेन जनिततत्तत्फलं ब्रह्मसुखाविर्भूत्या निद्रायामिव सर्वदुःखविस्मरणं जातं नवेति पृच्छति ।

यशोदागीतमधुरैर्मृदुवेदान्तभाषितैः ।

लालितः प्रापितो निद्रां मुकुन्द इव मोदसे ॥ ३ ॥

यशोदेति । हे शिष्य त्वं यशोदागीतमधुरैर्यशोदाया नन्दपत्न्या गीतानि गायनानि कृतानि यानि तेषां माधुर्याणि मृष्टानि सुखविशेषा इत्यर्थः, तैर्लालितः क्रीडितः सन्निद्रां सुषुप्तिसुखं प्रापितः प्राप्तः कृतः सन्मुकुन्दः श्रीकृष्णो यथा मोदते हृष्यति सुखितो भवतीत्यर्थः, तद्वत्त्वं यशोदागीतमधुरैर्यशः कीर्तिं ददातीति यशोदा विवेकवती बुद्धिर्विद्येति यावत्तया गीतानि गानानि कृतानि गुरुमुखाच्छ्रुतानि वाक्यानि तेन माधुर्याणि सुखविशेषा येषु तानि तथोक्तानि तैर्मृदुवेदान्तभाषितैर्मृदूनि कोमलस्पर्शानि सूक्ष्मार्थत्वात्सुखजनकत्वाच्चेत्याशयः, यानि वेदान्तानामुपनिषदां भाषितानि वचांसि तैर्लालितो विक्रीडितः सन्निद्रां प्रपञ्चविस्मृतिलक्षणात्मसमाधिरूपां सुप्तिं प्रापितः प्राप्तः कृतो मोदसे हृष्यसि न वेति प्रश्नः किं पदानुवृत्तिः कर्त्तव्यात्रापि ॥ ३ ॥

इदानीं स्वरूपसुखानुभवेन तृप्तोसि किं न वेति पृच्छति।

नवनीतरसग्रासैश्चमत्कारैः स्वसंविदाम्।
अन्तराप्यायितो बालमुकुन्द इव खेलसि॥ ४॥

नवनीतेति। हे शिष्य त्वं बालमुकुन्द इव यथा बालमुकुन्दो बालो बालभावापन्नो मुकुन्दो मुक्तिप्रदो भक्तानां श्रीकृष्णो नवनीतरसग्रासैर्नवनीतं हैय्यङ्गवीनं तस्यैव ग्रासाः कवला भोग्या येषां ते तथोक्तास्तैः स्वसंविदां स्वस्य श्रीकृष्णस्य संविदश्चेतना अन्तःकरणवृत्तयश्चिदाभासविशिष्टा इत्यर्थः, तासां चमत्कारैर्विलासैरन्तराप्यायितोऽन्तरेव तृप्तः सन्खेलति क्रीडति तद्वन्नवनीतरसग्रासैर्नवनीतस्य हैय्यङ्गवीनस्य रस इव तृप्तिकारकत्वाद्रसः सुखं 'रसो वै स' इतिश्रुतेस्तदेव ग्रासो भोजनं येषां तैः स्वसम्विदां स्वाऽऽत्मरूपा याः सम्विदो ज्ञानानि तासां चमत्कारैर्विलासैरन्तराप्यायितोऽन्तरात्मन्येव तृप्तः सन्खेलसि किं नवेति प्रश्नः॥ ४॥

इदानीं स्वानन्दे स्थितोसि किं न वेति पृच्छति।

स्वात्मनि प्रलयं नीत्वा दृश्यमेकाकितां गतः।
किं नृत्यसि निजानन्दे महादेव इवात्मनि॥ ५॥

स्वात्मनीति। हे शिष्य त्वं महादेव इव यथा महादेवः शिवोऽहङ्कारदेवता रुद्र इति यावद्दृश्यं दर्शनविषयं जगत्स्वात्मनि स्वरूपेऽहङ्कारे प्रलयं नाशं नीत्वा प्रापय्यैकाकितामेकलत्वं गतः प्राप्तः सच्चिदानन्दे स्वात्मसुखे स्थितो भूत्वा नृत्यति तद्वद्दृश्यं ज्ञानविषयं समस्तं जगत्स्वात्मनि ब्रह्माभिन्ने प्रत्यगात्मनि प्रलयं प्रकृष्टो निर्बीजो लयो नाशस्तं नीत्वा प्रापय्य बाधं कृत्वेत्यर्थः, तत एकाकितामद्वैतरू-

पतां गतः प्राप्तः सच्चिदानन्दे निरतिशयात्मानन्द आत्मनि ब्रह्माभिन्ने प्रत्यगात्मनि स्थित्वा नृत्यसि किं नृत्यं करोषि किं न वेति प्रश्नः ॥ ५ ॥

इदानीं सविकल्पसमाधौ स्थितोसि किं नवेति पृच्छति।

सायङ्काले समाध्याख्ये स्निग्धां सर्वाङ्गसुन्दरीम्।
निजशक्तिमुमां पश्यन्महेश इव नृत्यसि॥ ६ ॥

सायंकाल इति। हे शिष्य त्वं महेश इव यथा महेशः शिवः सायंकाले प्रदोषसमये स्निग्धां प्रेमवतीं सर्वाङ्गसुन्दरीं सर्वाणि समस्तानि यानि अङ्गानि हस्तपादनासिकानेत्रादीनि तैः सुन्दरीं कमनीयां निजशक्तिं स्वशक्तिमुमां पार्वतीं पश्यन्नवलोकयन्नृत्यति नृत्यं करोति तद्वत्समाध्याख्ये समाधिनामनि सायंकाले सविकल्पसमाधिरूपप्रदोषसमये सविकल्पस्य समाधेः सर्वजगतो बाधपूर्वं स्फूर्तिसत्त्ववत्त्वेन प्रदोषकालत्वमिति भावः, स्निग्धां स्वात्मनि प्रेमवतीं सर्वाङ्गसुन्दरीं सर्वैः समस्तैरङ्गैरवयवैरनुभाव्यानुभवानुभवितृरूपैः सुन्दरीं कमनीयरूपामु—उकारवाच्यं लिङ्गशरीरं समष्टिव्यष्टिरूपं द्विविधं तदभिमानिद्वयमपि तैजसहिरण्यगर्भाख्यं तन्माति साक्षाद्दृश्यत्वेनावलोकयति सा तथोक्ता तां, यद्वा—उ ब्रह्मैव प्रत्यगभिन्नं माति अनुभवति सा तथोक्ता तां, 'यो जागार तमु सामानि यन्ती'ति श्रुतेर्निजशक्तिं निजा स्वीया शक्तिर्जगज्जननसामर्थ्यरूपा तां चिच्छक्तिं पश्यन्सन्साक्षादवलोकयन्सन् किं नृत्यसि यावत्प्रारब्धक्षयं व्यापृतिरूपं नृत्यं करोषि किमिति प्रश्नः ॥ ६ ॥

इदानीं दृश्यविलयपरिपाको जातो न वेति पृच्छति।

दृश्यं निपीय गरलं पाचयित्वा तदात्मनि।

मृत्युञ्जयपदं प्राप्तः किं हृष्यसि हरो यथा ॥ ७ ॥

दृश्यमिति । हे शिष्य त्वं यथा यद्वद्धरो हरति भक्त-दुःखमिति हरः सदाशिवो दृश्यं सर्वदेवासुरादिदृग्विषयं गरलं समुद्रादुत्पन्नं हालाहलं निपीय निशेषं पीत्वा तद्धालाहलमात्मनि स्वदेहे पाचयित्वा जारयित्वा मृत्युञ्जयपदं मृत्युञ्जयतीति मृत्युञ्जयस्तदेव पदं नाम प्राप्तः लब्धः सन् हृष्यति मोदते तथा तद्वद् दृश्यं ज्ञेयं सर्वं जगद्गरलं गरं विषं तद्धर्मं लाति अङ्गीकरोतीति गरलं स्वसेवकस्य नाशकत्वात्तन्निपीय निःशेषं पीत्वाऽऽत्मनः पृथगसत्त्वेनावलोकयित्वेत्यर्थः, तद्ग्रस्तं बाधितं जगदात्मनि प्रत्यगभिन्ने ब्रह्मणि पाचयित्वा पक्वं कृत्वा पुनरुदयाक्षमं कृत्वेत्यर्थः, मृत्युंजयपदं मृत्युं मृतिकारणं संसारं जयतीति मृत्युञ्जयो ब्रह्म तस्य पदं स्वरूपं प्राप्तो यातः सन् हृष्यसि नित्यतृप्तो जातोसि किं न वेति प्रश्नः ॥ ७ ॥

इदानीमन्तःकरणवृत्तौ स्वात्मानं साक्षात्पश्यसि नवेति पृच्छति ।

यथा संमुखतां नीत्वा मुकुरे मुखमीक्षितम् ।
अखण्डवृत्तौ च तथा स्वरूपं किं विलोकितम् ॥८॥

यथेति । हे शिष्य त्वया यथा यद्वत्सन्मुखतां स्वसन्मुखतां दर्पणं मुकुरं नीत्वा प्रापयित्वा तस्मिन्मुकुरे दर्पणं मुखं वदनमीक्षितमवलोकितं तथा तद्वत्स्वरूपं स्वस्यात्मनो रूपमाकृतिं स्वतो द्रष्टुमशक्यमपि अखण्डवृत्तौ ध्यानाभासेनाखण्डाकाराकारितायां वृत्तावहंब्रह्मास्मीत्याकारायामित्यर्थः, स्वरूपं स्वस्यात्मनो रूपं सच्चिदानन्दघनमविलोकितं दृष्टं किं नवेति प्रश्नः ॥ ८ ॥

इदानीं मायायामन्तर्बहिश्चात्मानं जगद्रूपां मायां च दृष्ट्वा परमाश्चर्यवाञ्जातोसि किं नवेति पृच्छति ।

बहिरन्तर्हरिं पश्यन्मायां पश्यञ्जगन्मयीम् ।
विस्मयं परमं यासि मार्कण्डेय इवात्मनि ॥ ९ ॥

इति श्रीनरहरिकृतौ बोधसारे श्रीगुरुप्रश्नामृतं चत्वारिंशम् ॥४०॥

बहिरिति । हे शिष्य त्वं मार्कण्डेय इव यथा मार्कण्डेयो मृकण्डुपुत्रो बहिर्बाह्यदेशे वटपत्रस्थितं बालमुकुन्दरूपमन्तश्च तद्देहे प्रविष्टः सन्स्वाश्रमे नारायणरूपं हरिं विष्णुं पश्यन्नवलोकयन् मायां च मुकुन्ददेहाद्बहिर्बाह्यदेशेऽन्तश्च तद्देहे जगत्स्वाश्रमादिदृश्यरूपां जगन्मयीं जगद्रूपां पश्यन्नवलोकयन्सन्परममुत्कृष्टं विस्मयमाश्चर्यं यातः प्राप्तस्तद्वद्बहिर्जगतो बाह्यदेशे स्वस्वरूपे स्थितमन्तश्च जगति स्वदेहे सच्चिदानन्दरूपेणानुवृत्तं हरिं सर्वद्वैतहरणशीलं प्रत्यगभिन्नं ब्रह्म पश्यन्नवलोकयन्सन्मायामपि सदसत्त्वादिलक्षणैर्निरूपयितुमशक्यां जगन्मयीं जगद्रूपां पश्यन्नवलोकयन्सन्नात्मनि अन्तःकरणे परमं श्रेष्ठमुत्कृष्टमित्यर्थः, विस्मयमाश्चर्यं यासि प्राप्नोषि किं किमु न वेति प्रश्नः ॥ ९ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ श्रीगुरुप्रश्नामृतार्थप्रकाशश्चत्वारिंशः ॥ ४० ॥

अथ शिष्यप्रतिवचनम् ।

इदानीं शिष्यप्रतिवचनं निरूपयितुं शिष्यप्रतिवचनाख्यमेकश्लोकं प्रकरणमभिदधान आह ।

अथ शिष्यप्रतिवचनम् ।

अथेति । अथ गुरुप्रश्नामृतनिरूपणानन्तरं शिष्यप्रतिवचनं शिष्यस्य च्छात्रस्य प्रतिवचनं प्रत्युत्तरणमेतन्नामकं प्रकरणं

निरूप्यत इति शेषः, तदेवाह ॥

श्रीगुरो सानुभावानां करुणापूर्णचेतसाम् ।

श्रीमतां कृपया नूनमस्माकं किमु दुर्लभम् ॥ १ ॥

इति श्रीनरहरिकृतौ बोधसारे शिष्यप्रतिवचनमेकचत्वारिंशम् ॥ ४१ ॥

श्रीगुरो इति । हे श्रीगुरो श्रिया स्वरूपसंपदा युक्तो गुरुस्तस्य संबोधने हे श्रीगुरो अनेन संबोधनेन त्वादृग्गुरूणां कृपया शिष्याणां सर्वं सुलभमिति सूचितं, तदेव स्पष्टमाह सानुभावानामिति, सानुभावानामनुभावः प्रतापस्तेन सहितानां, यद्वाऽनुभावः स्वात्मानुभवस्तेन सहितानामित्यर्थः, अत एव करुणापूर्णचेतसां करुणया दयया पूर्णं भरितं चेतश्चित्तं येषां तेषां श्रीमतां स्वसाक्षात्कारसंपत्तिमतां युष्माकं कृपया दययाऽस्माकं त्वच्छिष्यभावं प्राप्तानां नूनं निश्चयेन दुर्लभं दुःप्रापं किमु किमस्ति न किमपि सर्वमपि सुलभमेवेत्यर्थः ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपिकायां शिष्यप्रतिवचनार्थप्रकाश एकचत्वारिंशः ॥ ४१ ॥

अथ चर्याचतुष्टयी ।

एवं शिष्यप्रतिवचनमभिधायेदानीं शिष्याणां ज्ञानित्वाभिमानेन निषिद्धाचरणे प्रवृत्तिं वारयितुं पूर्णज्ञानिनां तत्र प्रवृत्तावपि तद्दोषं च दर्शयञ्चर्याचतुष्टय्याख्यं चतुश्श्लोकं प्रकरणमभिधास्यन्नाह ।

अथ चर्याचतुष्टयी ।

अथेति । अथ शिष्यप्रतिवचननिरूपणानन्तरं चर्याचतुष्टयी चर्यायाः आचारस्य निर्णायिका चतुष्टयी चतुःश्लोकसमूहरूपैतन्नामकं प्रकरणमित्यर्थः, निरूप्यत इति शेषः, तत्र तावदादौ

ब्रह्मविदो 'न मातृवधेन न भ्रूणहत्यया' इत्यादिश्रुत्या निषिद्धा-
चरणस्य दोषाभावप्रतिपादनात्केवलं तत्रैव ब्रह्मविदां भूयादिति तत्र
प्रवृत्त्याऽशोभाकारित्वं सदृष्टान्तमाह ।

जात्या यद्यपि गौरमेव वदनं रूपस्य नास्ति क्षति-
स्तत्किं कज्जलकालिमा मुखतले संलापनीयो बुधैः ।
अस्तु ब्रह्मविदः कृतैरपि न तैर्दुष्कर्मभिश्चेत्क्षतिः
किं कामादिकदर्थिता वरमहो निःसङ्गसौख्यं वरम् ॥ १ ॥

जात्येति । हे शिष्य ब्रह्मविदो ब्रह्म देशकालवस्तुकृतपरि-
च्छेदशून्यं वस्तु वेत्ति जानातीति ब्रह्मवित्तस्य ब्रह्मविदः कृतैरा-
चरितैरपि तैर्नरकादिप्रापकैर्ब्रह्महननादिभिर्दुष्कर्मभिर्दुष्टानि नि-
षिद्धानि यानि कर्माणि तैः क्षतिर्नाशो न नास्ति चेद्यदि तर्हि अस्तु
भवतु दोषाभावः श्रुतिप्रामाण्यात्तथापि कामादिकैः कामादिकद-
र्थिता कामो विषयभोगेच्छाऽऽदिर्येषां क्रोधादीनां तैः कदर्थिता
तुच्छता वरमुत्तमं किमहो किमुत निःसङ्गसौख्यं निःसङ्गं नाशा-
दिभिरसंबद्धं सौख्यं सुखमेव सौख्यं निरतिशयं सुखमित्यर्थः,
वरं श्रेष्ठं तद्भवेदिति शेषः, तत्र दृष्टान्तो वदनं यद्यपि मुखं जात्या
स्वभावेन गौरवर्णमस्ति अत एव तत्र लग्नेनापि कज्जलेन रूपस्य
क्षतिर्हानिर्नास्त्येव न विकृत एव परन्तु नेत्रमात्रभागस्थेन
लग्नेन कज्जलेन रूपस्य क्षतिर्नास्तीत्युक्तं सत्यमेव किन्तु प्रस्तुत
रूपशोभाकार्येव तद्भवति अतो हेतोर्बुधैर्विवेकिभिर्मुखतले
वदनफलके कज्जलं कालिमा कज्जलस्य तैलादिसंयुक्तदीपकल-
भस्य काष्ण्यद्रव्यस्य कालिमा श्यामत्वं संलापनीयो लेपनीय
इत्यर्थः, अयं भावः—यद्यपि 'न मातृवधेन' इत्यादि श्रुतिभिर्ज्ञानिनां
निषिद्धाऽऽचरणे दोषाभाव उक्तस्तथापि न तत्र विचारः किन्तु

तीव्रप्रारब्धवशेन जातेपि तस्मिन् दोषाभाव उक्तोऽतस्तत्रैव न प्रवर्त्तितव्यमसङ्गात्मसुख एव रतिः संपाद्या यथा गौरवर्णे मुखे लोकव्यवहारवशेन मुखशोभायै नेत्रयोरञ्जनं कार्यमित्युक्ते नेत्रयोः कज्जलेऽञ्जिते तच्छोभा स्यात्तस्मिंश्च मुखतले संलापिते सति लोकेऽशोभैव स्यादेवं तीव्रप्रारब्धवेगेन कृतेपि निषिद्धकर्मणि तत्क्षयेन शुद्धिकारणत्वादन्तःकरणस्य ज्ञानिनो गुण एव तस्मिंश्च बुद्धिपूर्वं कृते च मुखमण्डले कज्जललेप इव लोकहासजन्यं दुःखमेव स्यात्, किञ्च तदाचरणेन च नरकादिजन्यं दुःखमेव स्यादतस्तत्र न प्रवृत्तिः कार्येति ॥ १ ॥

ननु विद्यावतां प्रबलश्रुत्योक्तस्य निषिद्धाचरणे दोषाभावस्य सत्त्वात्तदाचरणे को दोष इत्याशङ्क्याह ।

विद्यैवाधिगता सदामृतमयी विद्यावता तत्सुखं
स्थैर्यं वर्त्मनि सङ्गदोषरहिते सङ्गः पुनः कीदृशः ।
किं भूषाऽस्य वरा स्थितिः स्तुतिमयी सा राजसिंहासने
द्वारि द्वारि कपर्दिकार्थमटनं किं वाऽस्य राज्ञो वरम् ॥२॥

विद्यैवेति । विद्यावता ज्ञानिना विद्यैव ज्ञानमेवाऽधिगता प्राप्ता सा चामृतमय्यमृतं सुखं ब्रह्म तन्मयी तद्रूपाऽस्ति यदि यर्हि तर्हि सुखं यथा भवति तथा सङ्गदोषरहिते सङ्गः कामादिभिः सम्बन्धस्तज्जन्यो यो दोषो दुःखरूपमनिष्टं तेन रहिते व्यतिरिक्ते वर्त्मनि आचरणरूपे मार्गे स्थैर्यं स्थितिः कार्या पुनर्ज्ञानप्राप्तेरनन्तरं कीदृशः किं प्रकारः सङ्गः पापकर्मभिः सम्बन्धो नवेनैव भवेदित्यर्थः, ननु किं निःसङ्गसुखेन विदेहमुक्तिस्तु स्यादेव ज्ञानफलत्वात्तस्या इत्याशङ्क्य जीवतो मुक्तिसुखाननुभवे तस्य [illegible]रिति निश्चित्य सङ्गसुखा-

भिःसङ्गसुख आधिक्यं तदादराय प्रदर्शयन्दृष्टान्तेन पृच्छति किमिति, अस्य राजकुलोत्पन्नस्य प्राप्तराज्यस्य च पुरुषस्य राजसिंहासने राज्ञो नृपस्य यत्सिंहासनं पदं तस्मिंल्लोकादरणीयस्थान इत्यर्थः, सा प्रसिद्धा लोकपूज्या स्थितिः स्थानं सा वरा श्रेष्ठा भूषाऽलङ्कृतिः स्तुतिमयी स्तोत्ररूपा किं . किमु किं किंवाऽस्य प्राप्तराज्यस्य राज्ञो नृपस्य द्वारि द्वारि लोकानां द्वारे द्वारे कपर्दिकार्थं कपर्दकलाभेच्छयाऽटनं भ्रमणं वरं श्रेष्ठं तत्कथय निन्द्याचरणेन जीवन्मुक्तिसुखानुभवाभावाल्लोकनिन्दाजन्यदुःखाधिक्याच्च विदेहमुक्त्यभावेन च नरकदुःखस्य विद्यमानत्वाच्च न निन्द्याचरणे प्रवर्त्तितव्यमिति भावः ॥ २ ॥

ननु श्रुतिप्राबल्येन निन्द्याचरणे ज्ञानिनां प्रवृत्तिर्भवतु को दोष इत्याशङ्क्य प्रयोजनाभावान्न कार्येत्याशयेनाह ।

शिष्टाचारपथं विना यदि भवेदात्मप्रबोधो महां-
स्त्याज्यस्तर्हि तु सर्वदैव विदुषा वर्णाश्रमाणां क्रमः ।
वर्त्म ज्ञस्य विलक्षणं यदि कृतात्किंचाकृतात्कर्मणः
संगृह्णातु जनांस्तदा मुनिजनस्तेनापि नास्य क्षतिः ॥३॥

शिष्टाचारेति । हे शिष्य तव शिष्टाचारपथं विना शिष्टानां श्रेष्ठानामाचारः कर्म तदेव पन्था मार्गः स्वर्गापवर्गकारणत्वात्तं तथोक्तं विना वर्जयित्वा निन्द्याचरणेनेत्यर्थः, महान्प्रबोधो दृढं ज्ञानं यदि यर्हि भवेत्स्यात्तर्हि तु तर्ह्येव विदुषा ज्ञानिना वर्णाश्रमाणां वर्णाश्च ब्राह्मणाद्या आश्रमा ब्रह्मचर्याद्यास्तेषां क्रम आचारः सर्वदैव सर्वकालमपि त्याज्यस्त्यक्तुं योग्यः स्यान्निषिद्धाचरणेनैव ज्ञानप्राप्तौ सत्यां सर्वेषामेव मुक्तिः स्यादेवं च सर्वेषामपि तत्र प्रवृत्तौ सन्मार्गोच्छेद-

प्रसङ्गो न हि सन्मार्गगामिनां प्रवृत्तिस्तत्र दृश्यते न हि च नि-षिद्धाचाराणां मुक्तिरपि सर्वेषां दृश्यते किन्तु केवलनरकप्राप्तिरेव दृश्यते श्रूयते चाऽतो निन्द्यकर्मणि प्रवृत्तिर्नैव कार्येति भावः, ननु 'नैनं कृताकृते तपतः, एतꣳह वाव न तपति किमहꣳ साधु नाकरवं किमहं पापमकरवमि'त्यादिश्रुतिषिद्धानिषु सुकृतदुष्कृतभयाभावप्रतिपादनात्किं निष्फलसत्कर्माचार एवाग्रह इत्याशङ्क्य लोकसंग्रहफलसद्भावान्मैवमित्याह वर्त्मेति, अस्य ज्ञानिनो वर्त्माऽऽचरणरूपो मार्गः कृतात्कर्मणोऽकृतादकर्मणः कर्मत्यागादित्यर्थः, यद्वा कृतात्कर्मफलात्स्वर्गादेरकृतान्मोक्षाच्चात्र श्रुतिः ।

'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ।
अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदे'ति ॥

विलक्षणं भिन्नमस्तीति यदि चेद्वदसि तदा तर्हि मुनिजनो मुनीनां ज्ञानिनां जनः समूहो जनाल्लोकान्कर्माधिकारिजीवानित्यर्थः, संगृह्णातु ग्राहयतु स्वयं कर्म कृत्वा लोकानपि कारयतु इत्यर्थः, ।

'लोकसंग्रहमेवापि संपश्यन्कर्त्तुमर्हसी'ति ।

भगवद्गीतोक्तेः, ननु तर्हि लोकसंग्रहार्थमेव कर्म कुर्वतोपि तत्राऽऽसक्त्या बन्धः स्यादित्याशङ्क्याह तेनापीति, तेनापि लोकसंग्रहार्थं कृतेनापि कर्मणाऽस्य ज्ञानिनो क्षतिर्नाशो न न विद्यते निषिद्धाचारेण बन्धाभाव इव सत्कर्माचारेपि बन्धाभावाल्लोकसंग्रहाय सत्कर्माचार एव ज्ञानिना प्रवर्तितव्यमिति भावः ॥३॥

ननु तर्हि दत्तादीनां कथं तत्र तत्र पुराणेषु स्वेच्छाचारः श्रूयते इत्याशङ्क्याह ।

इन्द्रोऽसावहल्यो जडश्च भरतो मङ्किश्च संवर्त्तकः

कर्मभ्रष्टपथं गताः कथममी चेत्पूर्वपक्षस्तत्र ।
साधो जागरितान्प्रतीदमुदितं पश्यन्ति शृण्वन्ति ये
निद्रान्धा न विलोकयन्ति न पुनः शृण्वन्ति वाच्या न ते ४

इति श्रीनरहरिकृतौ बोधसारे चर्याचतुष्टयी द्विचत्वारिंशः ॥ ४२ ॥

दत्त इति । असौ पुराणेषु प्रसिद्धो दत्तो दत्तात्रेय ऋषभ ऋषभनामा राजा नाभेः पुत्रो जडो भरतो भागवते प्रसिद्धो जडभरतो मङ्किश्च मङ्किनामा मुनिरपि संवर्त्तकश्च संवर्त्तकनामेत्येतममीते कर्मभ्रष्टपथं कर्मभ्यो विहितकर्मभ्यो भ्रष्टश्च्युतो यो पन्था मार्गस्तं गताः प्राप्ताः कथं कुत इति तव पूर्वपक्षः प्रश्नश्चेद्यदि तर्हि हे साधो अनेन सम्बोधनेन तवं साधकत्वादेव कथितमिति सूचितं, तदेव स्पष्टमाह जागरितानिति, ये पश्यन्ति अवलोकयन्ति जगद्गतपदार्थाननुभवन्तीत्यर्थः, किञ्च शृण्वन्ति जगद्गतपदार्थनामानि श्रोत्रेणानुभवन्ति ताञ्जागरिताञ्जाग्रदवस्थावत इत्यर्थः, इदं लोकसंग्रहार्थं कर्म कर्त्तव्यमित्येवमुक्तं ये दत्तादय आत्मसाक्षात्कारानन्तरं न विलोकयन्ति न जगत्पदार्थान्पश्यन्ति न च नैव शृण्वन्ति तत्तत्पदार्थनामान्यपि श्रोत्रेण नानुभवन्ति ते निद्रान्धा निद्रया प्रपञ्चविस्मृतिलक्षणया सुप्त्याऽन्धाश्चक्षुर्हीनब्रह्मरूपास्ते पुरुषा न वाच्या न वचनार्हास्तेषां ब्रह्मरूपत्वाद्विधिनिषेधानधिकारितया सत्कर्महीना अपि न निन्द्या इति भावः ॥ ४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ चर्याचतुष्टय्यर्थप्रकाशो द्विचत्वारिंशः ॥ ४२ ॥

अथ ज्ञानगङ्गातरङ्गनाशीतिकम् ।

एवं चर्याचतुष्टयीं निरूप्येदानीं बहुसन्देहनिराकरणेन ज्ञा-

नदादावेव ज्ञानगङ्गातरङ्गोनाशीत्याख्यमेकोनाशीतिश्लोकं प्रकरणमभिदधान आह।

अथ ज्ञानगङ्गातरङ्गोनाशीतिकम्।

अथेति। अथ चर्याचतुष्पदीनिरूपणानन्तरं ज्ञानगङ्गातरङ्गोनाशीतिकं ज्ञानं ज्ञप्तिः सैव गङ्गा पवित्रकारकत्वात्।

'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते'।

इति गीतोक्तेः, यद्वा ज्ञानं ज्ञप्तिः सैवाऽऽत्मसंमुखतया सन्ततगतिमत्त्वात्सागरं प्रति सन्ततगमनवती गङ्गेव गङ्गा तस्यास्तरङ्गा इवास्मिन्प्रकरणे निरूपयिष्यमाणाः श्लोकास्ते तत्तत्संशयमलनिवर्तकत्वात्तरङ्गा भङ्गास्तेषामेकेनोना न्यूनाऽशीतिस्तत्संख्यानां श्लोकानां समूहरूपमेकोनाशीतिकं प्रकरणमुच्यत इति शेषः, तत्र तावदादावेतत्प्रकरणप्रयोजननिरूपणेनैतच्छ्रवणे शिष्यं प्रेरयति।

ज्ञानगङ्गातरङ्गोनाशीतिकं शृणु सांप्रतम्।
एकेनाप्यङ्गलग्नेन सर्वपापक्षयो भवेत्॥ १॥

ज्ञानगङ्गेति। हे शिष्य त्वं भवान्सांप्रतमधुना ज्ञानगङ्गातरङ्गोनाशीतिकं ज्ञानमहंब्रह्मास्मीतिप्रमारूपा वृत्तिस्तस्यैव ब्रह्मात्मविषये सन्ततप्रवाहवत्त्वात्पवित्रकारकत्वाच्च तदेव गङ्गेव गङ्गा तस्यास्तरङ्गास्तत्तद्विवेकरूपा वृत्तयस्तासां प्रतिपादकत्वादेतत्प्रकरणस्थश्लोकानां ज्ञानगङ्गातरङ्गत्वं तदाश्रयत्वादेतत्प्रकरणस्य च ज्ञानगङ्गात्वं तेषामूनाशीतिकमूना-एकोना याऽशीतिस्तत्परिमितानां श्लोकानां समूहरूपं वक्ष्यमाणं प्रकरणं समूहं कर्म, शृणु श्रोत्रेणानुभव श्रोतव्यमित्यर्थः, ननु ममैतत्प्रकरणश्रवणेन किं फलं स्यादित्याशङ्क्याहैकेनापीति, एके-

नापि ज्ञानगङ्गातरङ्गेण लौकिकगङ्गातरङ्गेणेवाङ्गलग्नेनाङ्गे लिङ्गशरीरे लग्नेन विचारपूर्वं स्थिरीभूतेन गङ्गातरङ्गपक्षे शरीरलग्नेन सर्वपापक्षयोऽखिलपापनाशो ज्ञानगङ्गातरङ्गपरामृष्टलिङ्गशरीरे सन्देहपापक्षयो भवेत्स्यादतो मुमुक्षुणा त्वयाऽन्यैश्चेदं प्रकरणं श्रोतव्यमिति भावः ॥ १ ॥

ननु चिद्रूपब्रह्मणो व्यापकत्वेन सर्वत्र विद्यमानत्वेपि कस्य चिल्लाभः कस्य चिदलाभोऽयुक्त इत्याशङ्क्य सदृष्टान्तं तत्सम्भावयति ।

वाङ्मयं खं हि सर्वत्र वाचो मूकस्य दुर्लभाः ।
चिन्मयं ब्रह्म सर्वत्र विद्याहीनस्य दुर्लभम् ॥ २ ॥

वाङ्मयमिति । चिन्मयं चिन्मात्रं ब्रह्म देशकालवस्तुकृतपरिच्छेदशून्यमात्मवस्तु सर्वत्र समस्तपदार्थेषु समस्तप्राणिष्वपि अस्ति विद्यते ज्ञानिदृष्ट्या तथा सत्यपि विद्याहीनस्य ज्ञानरहितस्य दुर्लभं दुःखेन श्रवणादिप्रयासेनैव लब्धुं शक्यं नानायासेन लब्धुं शक्यं साधनहीनस्य त्वप्राप्यमेव तदिति भावः, तत्र दृष्टान्तो हि यथा वाङ्मयं शब्दप्रचुरमाकाशस्य शब्दगुणवत्त्वात्खमाकाशं सर्वत्र समस्तप्राणिषु अस्ति तथापि मूकस्य मूकत्वफलकेन केन चित्कर्मणा वागिन्द्रियमप्राप्तस्य वाचो व्यक्तवाक्योच्चारा दुर्लभा दुःखेन तत्प्रापककर्माचरणेनायासेन लब्धुं शक्या नान्यथेत्यर्थः ॥ २ ॥

ननु ब्रह्मचैतन्यस्य स्वयं प्रकाशरूपत्वे सति कुतोऽन्तःकरणवृत्त्यप्रकाश्यत्वमित्याशङ्क्य सदृष्टान्तं तत्सम्भावयति ।

प्राचीमथ प्रतीचीं वा यत्र क चन गच्छतु ।
तमसा दृश्यते नैषा ब्रह्मचिद्भास्करो यथा ॥ ३ ॥

प्राचीमिति। यथा यद्वत्तमसा ह्यन्धकारेण नेत्रपटल-रूपेण वाऽऽवृतनेत्र इति शेषः, पुरुषः प्राचीं पूर्वदिशं प्रति अथवा यद्वा प्रतीचीं पश्चिमां दिशं प्रति अथवा यद्वा यत्र क्वचन यत्र कुत्रापि दक्षिणस्यामुत्तरस्यामध ऊर्ध्वं वेत्यर्थः, कुत्रापि सूर्यदर्शनाय गच्छतु यातु तथापि तत्तद्दिशां प्रकाशको भास्करः सूर्यो न दृश्यते नावलोक्यते स्वयंप्रकाशमानोपि सूर्यस्तिमिरावृतचक्षुषा यथा नैव दृश्यत इति भावः, तथा तद्वत्तमसाऽ-ज्ञानेनावृतः पुरुषो यत्र क्व चनोपासनयेन्द्रलोकादिब्रह्मलोकान्तं कर्मणा वा पितृलोकं निषिद्धकर्मणा वा नरकादिस्थावरान्तं कुत्रापि गच्छतु यातु तथापि एषा विद्वत्प्रत्यक्षा ब्रह्म-चिद्देशकालवस्तुकृतपरिच्छेदशून्या चित्सर्वचेत्यसामान्यप्रकाशिका चेतना न दृश्यते नावलोक्यते तस्याः स्वयं प्रकाशरू-पत्वे सत्यपि अज्ञानावृतप्राणिषु अप्रत्यक्षत्वं तदावरणशून्येषु-विद्वत्सु प्रत्यक्षत्वं चेति भावः ॥ ३ ॥

ननु प्रपञ्चासम्बद्धे ब्रह्मणि तदसम्बद्धप्रपञ्चस्य स्थितिः कथं सम्भाव्येत्याशङ्क्य तदपि सदृष्टान्तं सम्भावयति।

आकाशमण्डले शून्ये यथा नक्षत्रमण्डलम्।
चिद्ब्रह्ममण्डले शून्ये तथा संसारमण्डलम् ॥ ४ ॥

आकाशमण्डल इति। यथा यद्वच्छून्ये वास्तववाय्वादि-सम्बन्धरहितत्वान्नक्षत्रमण्डलसम्बन्धरहित आकाशमण्डल आकाशस्य त्रियतो मण्डले स्वरूपे नक्षत्रमण्डलं नक्षत्राणां ताराणां मण्डलं समूहोऽस्ति तथा तद्वच्छून्ये वास्तवप्रपञ्चमण्डलसम्बन्धरहिते स्वतोपि निराकारे प्रतीतिविषयत्वाभावाच्छून्य-रूपे च चिद्ब्रह्ममण्डले चिन्मात्रब्रह्मस्वरूपे संसारमण्डलं संसा-

राणां सर्गाणां मण्डलं समूहोऽस्ति आकाशस्य नक्षत्रमण्डलेन सह वास्तवसम्बन्धाऽभावेपि प्रातीतिकसम्बन्ध इव ब्रह्मसंसारमण्डलयोरपि वास्तवसम्बन्धाभावेपि प्रातीतिक एव सम्बन्धो ज्ञेय इति भावः ॥ ४ ॥

ननु मननवतो मुनेस्तुर्या स्थितिर्वर्ण्यते तत्र तत्र शास्त्रेषु तां कथयेत्यपेक्षां शिष्यस्यालक्ष्य तां प्रदर्शयति ।

जाग्रत्स्वरूप एवायं पश्यन्स्वप्नमयं जगत् ।
सुषुप्त इव चिद्रूपे मुनेस्तुर्यस्थताद्भुता ॥ ५ ॥

जाग्रदिति । सुषुप्ते निद्रायां सुषुप्त्यावृते प्रत्यगात्मनीति यावत्, तिष्ठन्वर्त्तमानः सन् स्वप्नरूपं प्रातिभासिकमित्यर्थः, इव यथा पश्यति तथा तद्वत्स्वरूपं स्वेनैवान्यनिरपेक्षतया रूप्यते प्रकाश्यत इति स्वरूपं तस्मिंश्चिद्रूपे मायोपाधिके जगत्कारणभूते चिद्रूपेऽव्याकृताभिधे जाग्रज्जाग्रदवस्थायां प्रतीयमानं जगद्विश्वं स्वप्नवन्मिथ्याभूतं पश्यन्नवलोकयन् सन् तिष्ठति स्थितिं करोति सैतादृशी मुनेर्ज्ञानिनस्तुर्यस्थता तुर्ये मायाशबले ब्रह्मणि स्थितिस्तत्ता तद्रूपताऽद्भुताऽऽश्चर्यरूपाऽस्ति सा वक्तुमशक्येति भावः ॥ ५ ॥

ननु तर्हि सा तुर्यस्थितिर्मुमुक्षोरपि मम कुतो न जायते तत्राह ।

मुमुक्षा दम्भमात्रं ते न ते तीव्रा मुमुक्षुता ।
तीव्रा यदि मुमुक्षा स्यान्न विलम्बो भवेदियान् ॥ ६ ॥

मुमुक्षेति । हे शिष्य ते तव मुमुक्षा मोक्षेच्छा दम्भमात्रं कपटमेव केवलमस्ति लोकप्रदर्शनार्थं केवलं सा त्वया धृतेति भावः, ननु मम मोक्षेच्छायाः पारमार्थिकत्वमेवास्ति न तु दाम्भिकत्व

मतः कुतो मे सा न प्राप्यत इत्याशङ्क्याह नेति, हे शिष्य ते तव तीव्रा दृढा फलपर्यन्तमपरिच्छिन्ना मुमुक्षुता मोक्षेच्छावत्त्वं न न विद्यते, ननु मम मोक्षेच्छाया अदार्ढ्यं भवता कथं निश्चितं तत्राह तीव्रेति, तीव्रा दृढा मुमुक्षा मोक्षेच्छा यर्हि स्याद्भवेत्तर्हीयानेतावान्विलम्बश्चिरकालस्तुर्यस्थितेर्न भवेन्न स्यादतो दाम्भिकमुमुक्षाया इदं फलं तदभावे वा तद्दार्ढ्यफलमिति निनिश्चितमस्माभिरिति भावः ॥ ६ ॥

ननु तर्हि मुमुक्षावतोपि मे सा प्राप्ता भवेन्नवेति सन्देहं कुर्वन्तं प्रत्याह ।

अभूत्कुहूमयं विश्वं पक्षः स मलिनो गतः ।
इदानीं निर्मलः पक्षो जातं राकामयं जगत् ॥ ७ ॥

अभूदिति । स त्वयानुभूतो मलिनः कृष्णः पक्षो मासार्धं गतो व्यतीतः कृष्णपक्षो गत इति कुतो ज्ञातं तत्राहाभूदिति, विश्वं दृश्यमानं पदार्थजातं कुहूमयं यस्याममावास्यायां चन्द्रकलानामत्यन्तमदृश्यता सा कुहूः 'सा नष्टेन्दुकला कुहूरि'त्यमरसिंहः, अन्धकाररात्रिर्ग्राह्या तन्मयं तत्प्रचुरमभूत्स्थितं पूर्वं तदिदानीं राकामयं राका पूर्णचन्द्रवती पूर्णिमा तया चात्र तद्रात्रिर्ग्राह्या तया प्रकाशितं जगज्जगद्गतपदार्थजातं जातं संपन्नमत इदानीमधुना निर्मलः शुक्लः पक्षो मासार्धं विद्यतेऽत इदानीं मलिनपक्षो गत इति निश्चेतव्यम्, अयमाशयः—पूर्वं तवान्तःकरणस्याज्ञानावृतत्वात् 'षोडशकलः सोम्य पुरुष' इति श्रुत्युक्तषोडशकलानां तदाऽऽवृतत्वेन तत्तत्त्रिपुटीरूपाणां तिथीनां मालिन्यमभूत्तेन चान्धकाररात्रिषु स्थाण्वादौ चौरादिविपरीतज्ञानवदाऽऽत्मन्येव तत्तद्रूपत्रिपुटीरूपज्ञानं विपरीतज्ञानमेव स्थितं स पक्षो

मलिन इदानीं गत इदानीं शुक्लपक्ष इव प्रतिपदादिपूर्णिमा-न्ततिथिषु चन्द्रकलाधिक्येन रात्रौ प्रकाशाधिक्याद्विपरीत-ज्ञाननिवृत्त्या स्थाण्वादिषु स्थाण्वादियाथार्थ्यज्ञानमिवाज्ञान-निवृत्त्या श्रवणादिपरिपाके जाते ज्ञानस्य यथोत्तरं वृद्ध्या प-ञ्चदशत्रिपुटीलक्षणतिथिषु त्रिपुटीबाधपूर्वमात्मयाथार्थ्यस्फुरणं जायतेऽत इदानीं शुक्लपक्षस्य ब्रह्मपक्षस्यैव प्रवृत्तिर्जातेति पूर्णमास्यां चन्द्रवत्पूर्णं ज्ञानमपि स्यादिति निश्चेतव्यमिति ॥७॥

ननु सूक्ष्मस्यापि मनसो यत्र स्थितिर्न सम्भाव्यते तत्र मुनीनां पर्वतवत्स्थितिः कथं सम्भाव्या तत्राह ।

न तिष्ठति मनो यत्र गोः शृङ्गे सर्षपो यथा ।

शैला इव समाधिस्थास्तत्रैव स्थितिमागताः ॥८॥

नेति । यथा यद्वद्गोर्धेनोः शृङ्गे विषाणे शृङ्गाग्र इत्यर्थः, सर्षपः शिरीषबीजं न तिष्ठति नैव स्थितिं प्राप्नोति तत्रैव शैला इव यथा शिलानां समूहरूपा पर्वताः स्वभारेण तदाक्रम्य स्थितिं स्थिरतामागताः प्राप्ता इति सम्भाव्यते तद्वद्यत्र ब्र-ह्माभिन्ने प्रत्यगात्मनि मनः सङ्कल्पविकल्पवदन्तःकरणं न ति-ष्ठति न विद्यमानं भवति असद्भवतीत्यर्थः, यद्वा न स्थिरं भ-वति तत्रैव ब्रह्माभिन्ने प्रत्यगात्मन्येव समाधिस्थाः समाधौ नि-र्विकल्पसमाधौ स्थिताः सन्तो मुनयः स्थितिमागताः स्थि-रतां प्राप्ताः ॥ ८ ॥

ननु मुनीनां मननस्थितिः सा कथं ज्ञातव्येत्यपेक्षां शि-ष्यस्यालक्ष्य गुरुराह ।

जलप्रवाह इव याऽनवच्छिन्ना स्वभावतः ।

चतुर्दशधियां दूरे सा मुनेर्मननस्थितिः ॥ ९ ॥

जलप्रवाहेति । हे शिष्य जलप्रवाह इव यथा जलस्य तोयस्य प्रवाहः स्रोतः स्वभावतः स्वभावेनैवानवच्छिन्नो निरन्तरोऽखण्ड इत्यर्थः, अस्ति तथा तद्वद्या विवेकिप्रसिद्धा स्वभावतः स्वभावेनैवाऽनवच्छिन्ना नैरन्तर्येण वर्तमाना मोक्षलक्षणा मुनेर्मननवतः पुरुषस्य मननस्थितिर्मननस्य स्थितिः स्थिरताऽन्येषां तस्य च चतुर्दशधियां चतस्रो मनोबुद्ध्यहङ्कारचित्ताख्या धियो ज्ञानानि दश च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि च पञ्चेति दश धियश्चैतासां चतुर्दशधियां चतुर्दशसङ्ख्याकज्ञानानां दूरे वर्तमानाऽविषयेत्यर्थः, अतः सा वर्णयितुं नैव शक्येति भावः ॥ ९ ॥

एवं मननस्थितेर्वचनाविषयत्वं निरूप्येदानीं तामेव लक्षणेन लक्षयति ।

परमात्मपदभ्रष्टः स पुनः परमात्मताम् ।
यया प्राप्नोति विश्वात्मा सा मुनेर्मननस्थितिः ॥१०॥

परमात्मेति । पूर्वमज्ञानेन परमात्मपदभ्रष्टः परं कार्यकारणातीतं यदात्मस्वरूपं पदं स्वरूपं तस्माद्भ्रष्टश्च्युतः स एव पुनर्भूयो विश्वात्मा विश्वस्य जगत आत्मा स्वस्वरूपभूतः परमात्मतां परमः कार्यकारणास्पृष्टो य आत्मा तस्य भावस्तद्रूपता तां यया स्थित्या प्राप्नोति याति सा मोक्षलक्षणा मुनेर्मननवतः पुरुषस्य मननस्थितिर्मननरूपा स्थितिरवस्था ज्ञेया ॥ १० ॥

तामेव पुनर्लक्षणान्तरेण लक्षयति ।

प्रतिबिम्बं न गृह्णाति निर्मलो निकटस्थितः ।
प्रपञ्चवच्चवे युक्तिः सा मुनेरेव नामुनः ॥ ११ ॥

प्रतिबिम्बमिति । कश्चिन्निर्मलः शुद्धो दर्पणो मुकुरः स-

मीपवर्त्त्यपि पदार्थानां नीलादिगुणवद्द्रव्याणां प्रतिबिम्बमाभासं न गृह्णाति नाङ्गीकरोति चेत्तद्वन्निर्मलो रागादिमलशून्यो निकटस्थितो जगद्गतपदार्थानां निकटे समीपे स्थितो वर्त्तमानः सन्नपि तेषां पदार्थानां प्रतिबिम्बमाभासं न गृह्णाति नैवाङ्गीकरोतीति या स्थितिः मोक्षलक्षणा प्रपञ्चवञ्चने युक्तिः प्रपञ्चस्य संसारस्य यद्वञ्चनं निरसनं तस्मिन्युक्तिः कुशलता मुनेरेव मननवत एव भवति अमुनेर्मननरहितस्य न न भवति ॥११॥

इदानीं मुनेः प्रतापं दर्शयति।

अपसर्पन्त्विति प्रोक्ताः क्षणादपसरन्त्यमी।
यदाज्ञया मनोभावाः स वशी कस्य नाद्भुतः ॥ १२ ॥

अपसर्पन्त्विति। अनेन मुनिना अपसर्पन्त्विति अपसर्पन्तु दूरं गच्छन्तु इत्येवं प्रोक्ता आज्ञप्ताः सन्तोऽमी एते प्रत्यक्षा मनोभावा मनसोन्तःकरणस्य विकाराः कामक्रोधादयो यदाज्ञया यस्य मुनेराज्ञा प्रेरणा तया क्षणात्क्षणमात्रकालेनैवापसर्पन्ति निवृत्ता भवन्ति स मुनिर्ज्ञानी कस्य कस्य विकारस्यापि वशी वशवर्त्ती न न भवति अतः सोऽद्भुतो लोकदृष्ट्या विषयवशी प्रतीयमानोपि विषयावशित्वादाश्चर्यरूप इति भावः ॥ १२ ॥

नन्वज्ञानिनां मनोवृत्त्यधीनत्वं ज्ञानिनां तु तदनधीनत्वमुक्तं तत्र मनस ऐक्ये पुरुषभेदेन विलक्षणकारित्वे को हेतुरित्याशङ्क्य सदृष्टान्तं हेतूक्त्या तत्सम्भावयति।

जारणात्कालकूटस्य शम्भोराशीविषा वशाः।
मारणान्मनसस्तद्वन्मुनेरिन्द्रियवृत्तयः ॥ १३ ॥

जारणादिति। कालकूटस्य कालकूटनामकं यत्समुद्रो-

त्पन्नं विषं तस्य जारणात्पाचनाद्, एवं हि पौराणिकी कथा-दुर्वाससः शापेन त्रैलोक्यलक्ष्मीः समुद्रे मग्ना तदा त्रैलोक्ये पीडित इन्द्रादिदेवैः सह ब्रह्मा विष्णुं शरणं जगाम तदा विष्णुना समुद्रमथने प्रेरितैर्देवासुरैर्मिलितैः समुद्रस्थितलक्ष्मीप्राप्त्यै समुद्रमथन आरब्धे सति ततः कालकूटं विषं प्रथममुत्पन्नं तेन च देवासुराः जगच्च सर्वे पीडिताः प्रलयकाल इव तदा शिवं शरणं गतेषु सर्वेषु शिवेन तद्रक्षणाय तद्भक्षितं पाचितं चेति तत एव शम्भोः शम्भुनामप्राप्तस्य शिवस्याऽऽशीविषा आशीषूरगदंष्ट्रासु विषं गरलं येषां ते तथोक्ताः सर्पाः स्वबलं शिवे न्यूनत्वादकिञ्चित्करं ज्ञात्वा वशाः स्वाधीना जाता यथा यद्वत्तद्वत्तथा मनसः सङ्कल्पविकल्परूपस्यान्तःकरणस्य मारणान्नाशान्मुनेर्मननवतो ज्ञानिन इन्द्रियवृत्तय इन्द्रियाणामन्तःकरणादिमहितानां श्रोत्रादीनां वृत्तयः स्वस्वविषयग्राहका अंशाः वशाः स्वाधीना जाताः ॥ १३ ॥

ननु मुमुक्षूणां प्रथममहंममतयोस्त्यागे विहिते तदशक्तेन किं कार्यमित्याशङ्क्याह ।

अहन्ताममतात्यागः कर्त्तुं यदि न शक्यते ।
अहन्ताममताभावः सर्वत्रैव विधीयताम् ॥ १४ ॥

अहन्तेति । हे शिष्य यदि यर्हि अहंममतात्यागोऽहन्ताया देहादिष्वहंभावस्य ममतायाश्च पुत्रदारादिषु ममत्वस्य च त्यागो विसर्गः कर्तुं सम्पादयितुं न शक्यते न पार्यते तर्हि सर्वत्रैव सर्वपदार्थेषु अपि अहन्ताममताभावोऽहन्ताया अहङ्कारस्य ममताया ममत्वस्य चाऽभावोऽसत्त्वैव विधीयतामनुसन्धीयतामनेनैवोपायेन मोक्षो भवेदिति भावः ॥ १४ ॥

इदानीं वर्णाश्रमधर्मेभ्यो विचारवैराग्ययोर्विशेषमादरं कर्त्तुं तच्छ्रैष्ठ्यमाह ।

वर्णाश्रमवयोवेषाध्ययनाचारसुन्दरः ।
विना विचारवैराग्यैः पशुरेव न संशयः ॥ १५ ॥

वर्णेति । वर्णाश्रमवयोवेषाध्ययनाचारसुन्दरो वर्णो ब्राह्मणादिस्तेनाऽऽश्रमश्च ब्रह्मचर्यादिस्तेन वयश्च तारुण्यं तेन वेषश्चालङ्कारः सौन्दर्यसम्पादनं तेन चाऽध्ययनं वेदादीनां पठनं तेनापि आचारश्च स्वविहितकर्मानुष्ठानं तेनापि सुन्दरो रमणीयो दृश्यमानोऽपि स पुरुषो विचारवैराग्यैर्विचारः सदसतोर्विवेको वैराग्यं च ब्रह्मपदान्तवस्तुषु काकविष्ठायामिव वैरस्यमादरे बहुवचनं तैर्विना ताभ्यां रहितश्चेत्पशुरेव तिर्यग्जन्तुरेव ज्ञातव्योऽत्र सन्देहः संशयो न नास्ति ॥ १५ ॥

ननु अन्यसाधनानामभावे केवलविचारवैराग्ययोर्मोक्षसाधकत्वासामर्थ्येन सामान्यत्वमस्त्वित्याशङ्क्य तयोः प्रधानत्वं दर्शयति ।

तीक्ष्णे विचारवैराग्ये चित्ते यस्य निरन्तरे ।
स पण्डितः किमेतस्य साधनान्तरचिन्तनैः ॥ १६ ॥

तीक्ष्णे इति । हे शिष्य यस्य पुरुषस्य चित्तेऽन्तःकरणे तीक्ष्णे दृढे अज्ञानभेदने समर्थे इत्यर्थः, विचारवैराग्ये विचारो विवेको वैराग्यं च ब्रह्मलोकान्तविषये तृणवत्तुच्छत्वबुद्धिस्ते उभे निरन्तरे सर्वदा वर्त्तमाने भवतः स पुरुषः पण्डितो ज्ञानी ज्ञेय एतस्योक्तलक्षणस्य ज्ञानिनः साधनान्तरकल्पनैः साधनान्तराणि अन्यसाधनानि तेषां कल्पनैः सङ्कल्पैः किं फलं न किमपि तैः प्रयोजनं तस्येत्यर्थः ॥ १६ ॥

ननु मुमुक्षूणां मोक्षस्यैवेष्टत्वात्तस्यान्तिकं ज्ञानमेव साधनमतस्तेनैव कृतार्थतास्तु किमापातिकेन वैराग्येणेत्याशङ्क्य प्रपञ्चवृक्षस्य शुष्कताकारणेन वैराग्येण विना तदसम्भवात्केवलज्ञानेन प्रपञ्चवृक्षस्य दाह आयासबहुत्वमार्द्रकाष्ठदाह इवेति समाधत्ते द्वाभ्यां, तत्रादौ दृष्टान्तमाह।

वर्धते मूलसेकेन मूलशोषण शुष्यति।
भस्मसात्क्रियते वह्निज्वालयेति तरुस्थितिः॥ १७॥

वर्धत इति। यथेत्यध्याहार्यं यथा यद्वन्मूलसेकेन मूलेषु यः सेकः सिच्यतेऽनेनेति सेको जलार्पणं तेन वृक्षो वर्धते एधते स एव मूलशोषेण मूलानां जलार्पणाभावेन यः शोषः शुष्कता तेन शुष्यति शुष्को भवति ततश्च वह्निज्वालया वह्नेरग्नेर्ज्वाला कीला तया भस्मसाद्भस्मरूपः क्रियते सम्पाद्यत इत्येवंप्रकारा तरुस्थितिस्तरोर्वृक्षस्य स्थितिर्गतिर्भवति॥ १७॥

वर्धते मनसः सेकैर्मनःशोषेण शुष्यति।
भस्मसात्क्रियते बोधज्वालयेति भवस्थितिः॥ १८॥

मूलेति। तथा तद्वन्मनसः संसारवृक्षस्यापि मनोमूलं तस्य तत्कल्पितत्वात्तस्य सेकैर्विषयजलार्पणरूपैः सिञ्चनैः प्रपञ्चवृक्षो वर्धत एधते स एव मनःशोषेण मनसः प्रपञ्चमूलभूतस्य शोषो वैराग्येण शुष्कत्वं तेन शुष्यति शुष्को भवति ततो बोधज्वालया बोधस्य जीवब्रह्मैक्यज्ञानस्याहंब्रह्मास्मीत्याकारस्य ज्वालाऽर्चिस्तया भस्मसाद्भस्मरूपो बाधितत्वेन तुच्छरूप इत्यर्थः, क्रियते सम्पाद्यत इत्येवंरूपा भवस्थितिर्भवः संसारस्तस्य स्थितिर्गतिर्भवति अतो ज्ञान इव मुमुक्षुभिर्वैराग्येऽप्यादरो विधेय इति भावः॥ १८॥

ननूपाधौ विद्यमानायां तत्र चित्प्रतिबिम्बः स्यात्तस्मिंश्च सति कथमद्वैतात्मस्वरूपसाक्षात्कारः स्याज्ज्ञानिनामित्याशङ्क्य सदृष्टान्तं तं सम्भावयति ।

परपारस्थितं हंसं द्विधेव प्रतिबिम्बितम् ।
तथात्मानं विजानाति तटस्थः सत्यदर्शनः ॥१९॥

परेति । यथा यद्वत्स्वस्थानात्परपारस्थितं परमन्यच्च तत्पारं तटं नदीतडागादेस्तत्र स्थितं वर्त्तमानं हंसं हंसनामकं पक्षिणं प्रतिबिम्बितं जलगतप्रतिबिम्बेन सह वर्त्तमानं द्विधेव द्विप्रकारेण प्रतीयमानमपि एकरूपं वेत्ति जानाति तथा तद्वत्सत्यदर्शनः सत्यं सत्यात्मविषयं दर्शनं दृश्यतेनेनेति दर्शनं ज्ञानं यस्य स तथाविधोऽत एव तटस्थस्तटेऽविद्यानद्यास्तीरे स्थितः सन्ज्ञान्यन्तःकरणाद्युपाधौ प्रतिबिम्बितेन सहानेकधाप्रतीतमप्यात्मानं पारमार्थिकमेकरूपं विजानाति वेत्ति अत उपाधौ सत्यपि तत्र च प्रतिबिम्बेन सहानेकधाप्रतीयमानेप्यात्मनि एकत्वानुभवः सम्भाव्य इति भावः ॥ १९ ॥

ननु ज्ञानिनि प्रतिबिम्बनिमित्तभूतान्तःकरणस्य विद्यमानत्वे पूर्ववत्संसारित्वापादनेन बन्धकं स्यादित्याशङ्क्याह ।

चित्रमल्पेन कालेन बोधभर्जितचेतसः ।
भर्जितस्येव बीजस्य कार्यसाधकता गता ॥२०॥

चित्रमिति । बोधभर्जितचेतसो बोधेन ज्ञानेन भर्जितं दग्धं यच्चेतोऽन्तःकरणं तस्याऽल्पेनाऽचिरेण कालेन समयेन कार्यसाधकता कार्यस्य संसारकल्पनारूपस्य कर्त्तव्यस्य साधकता कारणता गता नष्टेदं चित्रमाश्चर्यं यावान्कालो मनसः संसारकारणत्वसम्पादनेऽपेक्षितस्तावान् बोधस्य तन्नाशेऽपेक्षित

इत्येवमाश्चर्यं ज्ञेयं, तत्र दृष्टान्तो भर्जितस्येति, यथा भर्जितस्याग्निपक्वस्य बीजस्य चणकादिबीजस्याऽङ्कुरजननादिरूपकार्यसाधकत्वं नश्यति तद्वद्, अयमाशयः—भर्जितचणकादेर्भक्षणाद्युपयोगेन क्षुन्निवारणादिकिंचित्कार्यसाधकत्वेपि अङ्कुरादिजननकार्यसाधकत्वाभाव इव मनसोपि ज्ञानभर्जितस्य प्रारब्धभोगसाधकत्वेपि संसारबन्धनरूपकार्यसाधकत्वाभावस्तथा मनसः संसारसङ्कल्पने यावान्कालोऽपेक्ष्यते तावान्कालो बोधेन तन्नाशे नापेक्ष्यते यथा चणकादेरङ्कुरादिजनने यावान्कालोऽपेक्ष्यते तावान्कालोऽग्निना तद्दाहे नापेक्ष्यते तद्वदित्याश्चर्यमिति ॥ २० ॥

ननु तर्ह्यन्तःकरणादीनामसन्तलयेन केवलं ब्रह्मसुखानुभव एव संपाद्यः किमन्तःकरणेन चक्षुरादिनिःसृतेन जगद्विषयास्वादे प्रवृत्त्येत्याशङ्क्याह ।

पङ्गवस्तु कृता एव दृगाद्या न चलन्ति यत् ।
अन्धानपि करिष्यामि न पश्यन्ति यथा जगत् ॥ २१ ॥

पङ्गव इति । हे शिष्य दृगाद्याः दृग्दृष्टिराद्या प्रथमा येषां श्रोत्रादीनां ताः सर्वा वृत्तयः पङ्गवः पादहीनाः कृता एव संपादिता एव निश्चेतव्या भवता यद्यस्मात्कारणान्न चलन्ति स्वविषयेषु न सरन्ति अतस्तासां पङ्गुत्वं संपादितमिति भावः, अत ऊर्ध्वं तान्दृगादिपदार्थाश्चान्धानपि चक्षुर्हीनानपि करिष्यामि संपादयिष्यामि यथा येनान्धत्वसंपादनेन जगद्विश्वं न पश्यन्ति नावलोकयन्ति ॥ २१ ॥

ननु ब्रह्मणि ज्ञातेऽज्ञाते वा जीवस्य ब्रह्मसत्तयैव जीवनं तथा सति ज्ञाने कोऽतिशयस्तत्राह ।

जानातु वा न जानातु ब्रह्म जीवस्य जीवनम् ।

जानाति चेत्परो लाभो न जानाति भयं महत्॥२२॥

जानात्विति । अयं जीवो ब्रह्म देशकालवस्तुकृतपरिच्छेद-शून्यं वस्तु जानातु वेत्तु वाऽथवा न जानातु न वेत्तु तथापि उभयपक्षेपि तद्ब्रह्म जीवस्याऽधिष्ठानसहितबुद्धिस्थचिदाभा-सस्य सत्ताप्रदत्वेन जीवनं जीवनकारणभूतमस्त्येवैतत्सत्यमेव तर्हि ज्ञाने कोतिशयस्तत्राह जानातीति, अयं जीवस्तद्ब्रह्म जा-नाति वेत्ति चेद्यदि तर्हि परः श्रेष्ठो मोक्षरूपो लाभः प्राप्तिर-स्तीति ज्ञेया, स एव तन्न जानाति न वेत्ति चेद्यदि तर्हि महन्मृ-त्युरूपं भयं भीतिर्भवेदयं ज्ञाने विशेष इति भावः ॥ २२ ॥

ननु ब्रह्मणि को विशेषो येन तज्ज्ञानेन तल्लाभः संपाद्यः किं तु कामधेनूपासनया तत्साक्षात्कारेणेप्सितकामलाभात्तदेव सम्पाद्यमित्याशङ्क्य ब्रह्मणि ततो विशेषं दर्शयति ।

ब्रह्मधेनोः स्वभावोऽयं देवधेनोर्विलक्षणः ।
भोक्तैव तद्दुग्धपानात्सद्यस्तद्रूपतां व्रजेत् ॥२३॥

ब्रह्मधेनोरिति । भोक्तैव जीव एव सर्वविषयभोक्तृत्वेन प्रसिद्धः स तद्दुग्धपानात्तस्या ब्रह्मधेनोर्दुग्धं दुग्धवत्तृप्तिहेतुत्वा-त्सुखमत्र दुग्धपदेन ग्राह्यं दुह्यते तृप्तिरनेनेति व्युत्पत्त्या दुग्धं सुखं तस्य पानादास्वादनात्सद्यस्तत्कालमेव तद्रूपतां ब्रह्मधेनुरूपत्व-मेवेयात्प्राप्नुयादयमुक्तलक्षणो ब्रह्मधेनोर्ब्रह्म देशकालव-स्तुकृतपरिच्छेदशून्यं वस्तु तदेव धिनोति प्रीणाति जगदिति धेनुरानन्दरूपत्वेन जगदानन्दप्रदत्वात्तस्याः स्वभावः शील-मस्ति स देवधेनोर्देवानिन्द्रादीन्धिनोति प्रीणातीति देवधेनु-स्तस्याः स्वभावाद्विलक्षणो विचित्रो देवधेनोः स्वभावे तत्तत्का-मपूरकत्वेपि न स्वरूपप्रापकत्वं ब्रह्मधेनोस्तु तत्तत्सुखप्रापकत्वे

सति स्वरूपप्रापकत्वं विशेष इति भावः ॥ २३ ॥

इदानीं ब्रह्मण्येव स्थिरत्वसंपादनाय तत्साधनाभ्यासे प्रवृत्तये वृद्धसंमतिमाह ।

यदि योगे कृता बुद्धिः सप्तमीं गच्छ भूमिकाम् ।
मग्नश्चेद्गच्छ पातालमिति नीतिविदां वचः ॥ २४ ॥

यदीति । हे मुमुक्षो यदि यर्हि त्वया साधकेन बुद्धिर्निश्चयात्मिकान्तःकरणवृत्तिः कृता योजिता तर्हि सप्तमीं तुर्याभिधां भूमिकां ध्रुवं स्थितिमित्यर्थः, गच्छ व्रज ततस्तत्र यदि मग्नो लीनश्चेद्यदि तर्हि पातो नाश आलीनो नष्टो यत्र तत्तथोक्तं ब्रह्म गच्छ प्राप्नुहि ली लय इति धातोराङ्पूर्वाद् 'अन्येभ्योपी'ति डप्रत्ययश्च, इत्येवं नीतिविदां नीतिं न्यायं विदन्ति ते नीतिविदस्तेषां वेदान्तिनामित्यर्थः, वचो वाक्यमतोऽस्य प्रामाण्यं मत्वाऽभ्यास आदरो विधेय इति भावः ॥ २४ ॥

ननु केवलचिन्मात्राकारवृत्तौ सम्पादितायां मोक्षः स्यादित्युक्तं तत्सत्यं तदशक्तौ किं कर्त्तव्यं मुमुक्षुभिरित्याशङ्क्योपायान्तरं तस्य सदृष्टान्तमाह ।

मध्याह्नभास्करं द्रष्टुं साक्षाद्यदि तु न क्षमम् ।
पटव्यवहितं पश्येज्जले वा प्रतिबिम्बितम् ॥ २५ ॥

मध्याह्नभास्करमिति । मध्याह्नभास्करं दिने मध्यभागगतं सूर्यं साक्षाच्चक्षुषेक्षितुं द्रष्टुं यदि यर्हि न क्षमं न शक्यं तर्हि सूर्यसाक्षाद्दर्शनेच्छावता पुरुषेण किं कर्त्तव्यं तदाह पटेति, तदा मध्याह्नसूर्यं पटव्यवहितं पटेन सूक्ष्मवस्त्रेण व्यवहितमन्तर्हितं यथा तथा पश्येदवलोकयेद्वाऽथवा जले उदके प्रतिबिम्बितमाभासितं पश्येदवलोकयेत्ततश्च दृष्टेः स्थिरतायां सत्यां साक्षाद्द्रष्टुं स-

मर्थोपि भवेदिति भावः ॥ २५ ॥

दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह ।

तथा चिन्मात्रचण्डांशुं निर्विकल्पं न चेत्क्षमः ।

सर्वव्यापितया पश्येदन्तर्यामितयाऽथवा ॥ २६ ॥

तथेति । मुमुक्षुरपि तथा तद्वच्चिन्मात्रचण्डांशुं चैतन्यस्वरूपचण्डांशुं तीक्ष्णांशुं सूर्यमित्यर्थः, निर्विकल्पं निर्गता निवृत्ता विकल्पा देहनामजात्यायुःकल्पना विपरीतकल्पना यस्मात्तथाभूतं ब्रह्माभिन्नप्रत्यगात्मानं साक्षादहमिति प्रत्यक्षं द्रष्टुमवलोकयितुं क्षमः समर्थो न चेन्न भवेद्यदि तर्हि तदा सर्वव्यापितया सर्वस्मिन्द्वैतजाते व्यापितया व्यापनस्वभावेन लक्षितमात्मानं पश्येदवलोकयेच्चिन्तयेदित्यर्थः, अथवा तत्राप्यसामर्थ्ये सति अन्तर्यामितया सर्वेषु भूतेषु भौतिकपदार्थेषु अन्तर्यमयति प्रेरयति भूतानीति अन्तर्यामी तस्य भावस्तत्ता तया लक्षितमात्मानं पश्येदवलोकयेत्ततश्चान्तःकरणशुद्धिर्यथा यथा भवेत्तथा तथाऽऽत्मसाक्षात्कारोपि स्यादिति भावः ॥ २६ ॥

ननु सर्वव्यापिधारणायामन्तर्यामिधारणायां वाऽभ्यस्यमानायां सत्यामपि आत्मसाक्षात्कारस्तत्फलं भवेन्न वेत्यत्र को निश्चयः, किं च तन्निश्चयेपि कियत्कालं साभ्यसनीयेत्याशङ्क्य तन्निश्चयाय तदभ्यासविधिं च दर्शयितुं दृष्टान्तमाह ।

लक्षं शराः प्रयोक्तव्याः सूक्ष्मे लक्ष्येऽपि धन्विना ।

कदाचिद्दैवसंयोगादेकोपि तु लगिष्यति ॥ २७ ॥

लक्षमिति । धन्विना धनुष्मता पुरुषेण सूक्ष्मेपि दृगगोचरेपि लक्ष्ये वेधार्थे लक्षिते कस्मिंश्चित्पदार्थे लक्षं लक्षशः शराः सायकाः प्रयोक्तव्याः प्रयोजनीयाः, तथा कृते सति किं स्यात्तदाह

कदाचिदिति, दैवसंयोगाल्लक्ष्यबाणयोः संयोगजनकं कर्म यदा पुष्टं सत्तत्संयोगफलोन्मुखं जातं तदत्र दैवपदेन ग्राह्यं तेन दैवेन यः संयोगो बाणलक्ष्ययोः सम्बन्धो जायमानस्तस्माद्भि-मिषादेकोपि तु एक एवापि लगिष्यति लक्ष्ये संयुक्तो भवि-ष्यतीति संभावनीयम्, अपि संभावनार्थः ॥ २७ ॥

दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह ।

सदैव चेतसो वृत्तिर्ध्यानाभ्यासे विधीयताम् ।
कदा चित्कृपया शम्भोरखण्डाकारता भवेत् ॥२८॥

सदैवेति । मुमुक्षुणा पुरुषेण चेतसोऽन्तःकरणस्य वृत्ति-श्चिदाभाससहिता निश्चयात्मिका बुद्ध्यपरपर्याया सदैव निर-न्तरमेव ध्यानाभ्यासे ध्यानमात्मविजातीयप्रत्ययानन्तरितात्म-सजातीयविषयवृत्तिप्रवाह इति लक्षणलक्षितं तस्याभ्यासः पुनः पुनरावृत्तिरूपस्तस्मिन्विधीयतां योज्यतां तथा कृते किं स्यात्त-दाह कदाचिदिति, कदाचित्कस्मिन्नपि काले ध्यानाभ्यासेन प्र-सादितस्य शंभोः शं सुखं भवति जीवेऽस्मादिति शम्भुः प्रत्यगा-त्मा तस्य कृपया दयया विवेकोत्पादनरूपयाऽखण्डाकारता-ऽखण्डं भेदरहितं यद्ब्रह्म तस्याकारः सच्चिदानन्दरूपस्तस्य स-त्ता तत्ता ब्रह्मरूपतेत्यर्थः, भवेत्स्यादतो निश्चयेन ध्याना-भ्यासो विधेय इति भावः ॥ २८ ॥

ननु ध्याने कृतेऽकृते वा ब्रह्मणि तत्कृतातिशयाभावाज्जी-वेपि तस्मिन्नुभये सति पारमार्थिकब्रह्मरूपत्वस्य सिद्धान्तित-त्वाच्च किं तदाकारवृत्त्युत्पादनायासेनेत्याशङ्क्य तदभावे मु-क्त्यभावं प्रतिपादयितुं ब्रह्माकारवृत्तिसम्पादने च प्रवर्त्तयितुं ब्रह्मणि तद्विदः सकाशान्न्यूनत्वदर्शनायोत्तरश्लोकद्वयं तत्र च पूर्वश्लोकस्यान्यार्थत्वप्रतीतेः प्रकृतार्थत्वं दर्शयितुं स्वयमेवाह ।

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रह अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ५ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्ड २)	५	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०